NOT TO BE ISSUED
OUT OF THE LIBRARY.

SK
891-22
Sni/Rat.
748

00000748

PRESENTED
TO
THE LIBRARY
OF THE
BOMBAY BRANCH ROYAL ASIATIC
SOCIETY
BY
Shree S.V. Bhandarkar

Digitized with financial assistance from the
Government of Maharashtra
on 18 July, 2018

MAJUMDARA'S SERIES.

RATNAVALI

A DRAMA

IN IV ACTS.

BY

SRÍHARSHA

AN ANCIENT RÁJÁ OF CASHMERE.

EDITED AT THE REQUEST OF BABU BARADÁ PRASADÁ MAJUMDARA.

BY

NRISINHA CHANDRA MUKERJEE VIDYÀRATNA, M. A., B. L.

WITH NOTES EXPLANATORY OF THE DIFFICULT PASSAGES AND WITH TRANSLATIONS OF THE PRAKRITA PASSAGES INTO SANSKRIT.

CALCUTTA.

PRINTED BY A. L. CHOWDHORY AT THE B. P. M'S PRESS.

No. 22 Jhamapooker Lane.

1871.

Price 12 *Annas.* মূল্য বার আনা।

SK 891.22
Sri/Rat

748
7 DEC. 1962 NC

MAJUMDARA'S SERIES.

रत्नावली

नाटिका ।

श्रीश्रीहर्षदेवविरचिता ।

श्रीयुक्तबाबुवरदाप्रसादमजुमदारस्य प्रार्थनया

श्रीनृसिंहचन्द्रविद्यारत्नेन संक्षिप्तटीकया

प्राकृतभाषाव्याख्यया च सहिता

संस्कृता ।

कलिकातराजधान्याम्

वि. पि. एमस् यन्त्रे

श्रीअमृतलालचक्रवर्त्तिनेन यत्नेन

मुद्रिता ।

संवत् १९२८ ।

Price 12 Annas. मूल्य बार आना

বিজ্ঞাপন।

রত্নাবলী অতি উৎকৃষ্ট নাটিকা, কাশ্মীরদেশের অন্যতম প্রধান রাজা শ্রীহর্ষদেব ইহার প্রণেতা। সংস্কৃত ভাষায় যাবতীয় দৃশ্যকাব্য আছে, রত্নাবলীর ভাষা সর্ব্বাপেক্ষা কোমল; সুতরাং সংস্কৃতপাঠার্থী-দিগের পক্ষে অন্য অন্য অপেক্ষাকৃত কঠিন নাটক নাটিকা পাঠ করিবার পূর্ব্বে ইহাই পাঠ করা সর্ব্বতোভাবে বিধেয়। পূর্ব্বে রত্নাবলী এতদ্দেশে দুই বার মাত্র মুদ্রিত হইয়াছিল। সম্প্রতি উভয় পুস্তকই নিঃশেষিত হইয়াছে। অতএব আমি আমার কাব্যপ্রকাশিকার নিয়-মানুসারে ইহা মুদ্রিত ও প্রকাশিত করিলাম। ইহাতে পাঠার্থীদিগের সুবিধার নিমিত্ত সমুদয় কঠিন স্থলের টীকা করা হইয়াছে। টীকা করিবার ভার সংস্কৃতকালেজের অন্যতম শিক্ষক শ্রীযুক্ত বাবু নৃসিংহচন্দ্র মুখোপাধ্যায় বিদ্যারত্ন এম্, এ, বি, এল, মহাশয়কে দিয়াছিলাম। তিনিও যথেষ্ট পরিশ্রম স্বীকার করিয়া এই রত্নাবলীর টীকা এবং মূলও সংশোধন করিয়া দিয়াছেন। এক্ষণে ইহা দ্বারা পাঠকগণের কিঞ্চিদংশে উপকার হইলেই আমার আশা ফলবতী হয়। রত্নাবলীর বাঙ্গালা অনুবাদও অবিলম্বেই প্রকাশিত হইবেক কিমধিকমিতি।

শ্রী বরদাপ্রসাদ মজুমদার।

কলিকাতা।
২৯এ শ্রাবণ। ১২৭৮ সাল।

বিজ্ঞাপন।

রত্নাবলী এক খানি অতি রমণীয় নাটিকা। সংস্কৃত ভাষায় নাটিকা প্রভৃতি যাবতীয় উপরূপক আছে, বোধ হয় রত্নাবলী তন্মধ্যে সর্ব্বাপেক্ষা উৎকৃষ্ট। ইহার সংস্কৃত অতীব কোমল ও মধুর, এবং প্রাকৃত নিতরাং ললিত মনোহারি ও হৃদয়গ্রাহক। কশ্মীরদেশের অধিপতি শ্রীহর্ষদেব এই উৎকৃষ্ট নাটিকার রচয়িতা। কহ্লণপণ্ডিতপ্রণীত রাজতরঙ্গিণী গ্রন্থে লিখিত আছে যে শ্রীহর্ষদেব অশেষদেশভাষাজ্ঞ সৎকবি ছিলেন। বস্তুতঃ রত্নাবলীর রচনাদৃষ্টে স্পষ্টই বোধ হয় যে ইহার রচয়িতা সুকবি ছিলেন। শ্রীহর্ষদেব সংবৎ একাদশ শতাব্দীর প্রারম্ভে কশ্মীরদেশের সিংহাসনে অধিরূঢ় হইয়া প্রায় দ্বাদশ বৎসর রাজত্ব করিয়াছিলেন, এবং ঐ সময়ের মধ্যেই রত্নাবলী লিখিত হয়। কাব্যপ্রকাশকার মম্মটভট্ট আপন গ্রন্থে নির্দ্দেশ করিয়াছেন যে ধাবক নামক কবি রত্নাবলীর রচয়িতা। তিনি শ্রীহর্ষদেবের নিকট প্রভূত অর্থ গ্রহণ করিয়া উক্ত গ্রন্থ তাঁহাকে প্রদান করেন, শ্রীহর্ষদেবও উহা নিজনামে প্রচারিত করেন। সংস্কৃতজ্ঞ ইয়ুরোপীয় পণ্ডিতেরাও মম্মটভট্টের মতে প্রমাণ বলিয়া আপন আপন গ্রন্থে নির্দ্দেশ করিয়াছেন, কিন্তু রাজতরঙ্গিণীতে যখন শ্রীহর্ষের কবিত্বের স্পষ্ট প্রমাণ রহিয়াছে, তখন তিনিই যে রত্নাবলী রচনা করিয়া থাকিবেন ইহা অসম্ভব নহে। ফলতঃ শ্রীহর্ষদেব রত্নাবলীর রচয়িতা হউন আর না হউন, রত্নাবলী যে সংস্কৃত ভাষার একখানি রত্নালঙ্কারস্বরূপ তাহাতে আর অণুমাত্র সন্দেহ নাই। কৌশাম্বীর অধিপতি বৎসরাজ রত্নাবলী নাটিকার নায়ক, ইহাতে বৎসরাজের সিংহলেশ্বরদুহিতা রত্নাবলীর সহিত প্রণয়বিষয়ের বর্ণিত হইয়াছে। সিংহলরাজ বৎসরাজের প্রেরিত মন্ত্রীর সমভিব্যাহারে নিজদুহিতা রত্নাবলীকে মহারাজের সহিত বিবাহার্থ তাঁহার রাজধানী প্রেরণ করেন। পথিমধ্যে সমুদ্রে যানভঙ্গ হইয়া রত্নাবলী ও অন্যান্য

আরোহিগণ বিপদ্‌গ্রস্ত হয়েন, কিন্তু সৌভাগ্যক্রমে তাঁহারা সকলেই রক্ষা পান। বৎসরাজের অমাত্য যৌগন্ধরায়ণ রত্নাবলীকে সঙ্গে লইয়া রাজধানীতে উপস্থিত হয়েন ও মহিষী বাসবদত্তার হস্তে সমর্পণ করেন, তদনুসারে রত্নাবলী অন্তঃপুরে পরিচারিকাবর্গের মধ্যে কিছু কাল অবস্থিতি করেন। সাগর হইতে উদ্ধৃত হইয়াছিলেন বলিয়া অন্তঃপুরে তাঁহার সাগরিকা এই নাম হয়। অমাত্য যৌগন্ধরায়ণ বাসবদত্তার নিকট রত্নাবলীর যথার্থ পরিচয় দেন নাই, সুতরাং দেবী বাসবদত্তাও তাঁহাকে পরিচারিকাদিগের মধ্যেই নিবিষ্ট করেন। এইরূপে কিছু কাল অতীত হয়, পরে এক দিন রত্নাবলী দৈবাৎ রাজার নয়নগোচর হয়েন। দর্শন করিয়া অবধি বৎসরাজ তাঁহার প্রতি অনুরক্ত হয়েন। রত্নাবলীও তাঁহাকে বৎসরাজ বলিয়া জানিতে পারেন ও তাঁহার প্রতি নিতান্ত অনুরক্তা হয়েন। এই ব্যাপার মহিষীর কর্ণগোচর হয়। মহিষী ঈর্ষাকষায়িতমনে স্থানান্তরকরণরূপ প্রবাদ ঘোষণা করিয়া তাঁহাকে রাজার নয়নপথবহির্ভূত করিয়া গোপনে রাখেন। এই সমস্ত ঘটনার কিছুকাল পূর্ব্বে রাজার সেনাপতি কোশলরাজ্য পরাজয় করিতে গিয়াছিলেন। সেনাপতি কোশলরাজ্য স্ববশে আনয়ন করিয়া প্রত্যাগত হইলেন এবং অব্যবহিত পরেই অমাত্য যৌগন্ধরায়ণ ও সিংহলেশ্বরের অমাত্য বসুভূতিও রাজসমীপে আসিয়া উপস্থিত হইলেন। এই সময় উজ্জয়িনী হইতে এক জন ইন্দ্রজালব্যবসায়ী রাজধানীতে আইসে, অমাত্য যৌগন্ধরায়ণ রত্নাবলী অন্তঃপুরের কোন্ স্থানে রক্ষিত হইয়াছেন জানিতে না পারিয়া, ঐ ইন্দ্রজালিককে সমুদয় অন্তঃপুর কাল্পনিক অগ্নিতে প্রজ্বলিত করিতে কহেন। অমাত্যের আজ্ঞানুসারে ঐন্দ্রজালিক সমুদয় অন্তঃপুর অগ্নিময় করিয়া ফেলে। তখন দেবী বাসবদত্তা রত্নাবলীর প্রাণরক্ষার্থ উঁহাকে গোপন স্থান হইতে মুক্ত করিয়া দেন। অমাত্য বসুভূতি উঁহাকে চিনিতে পারেন ও অমাত্য যৌগন্ধরায়ণও উঁহার যথার্থ পরিচয় দেন। ইতিপূর্ব্বেই তাঁহার পরিহিত রত্নাবলী দৃষ্টে সকলের মনে হইয়াছিল যে সাগরিকা কোন মহৎ পরিবারের কন্যা, এক্ষণে পরিচয় পাইয়া সকলেই আনন্দসাগরে মগ্ন হইলেন, বাসবদত্তা উজ্জয়িনীরাজের দুহিতা ও রত্নাবলী তাঁহার মাতুলের কন্যা

সুতরাং মহিষীও রত্নাবলীকে পাইয়া যার পর নাই আনন্দিত হয়েন। অনন্তর রত্নাবলীর সহিত বৎসরাজের বিবাহ হয়।

রত্নাবলীর চারি অঙ্কে এই সমস্ত বিষয় যথাক্রমে বর্ণিত হইয়াছে। সোমদত্তপ্রণীত বৃহৎকথানামক গ্রন্থে এই বিষয় বর্ণিত আছে। বোধ হয় শ্রীহর্ষ বৃহৎকথা হইতেই নিজ বর্ণনীয় বিষয় গ্রহণ করিয়াছিলেন।

প্রায় ৩৯ বৎসর গত হইল রত্নাবলী কলিকাতায় কমিটী অব্ পব্লিক ইনস্ট্রুক্সন নামক সমাজকর্ত্তৃক সর্ব্বপ্রথম মুদ্রিত হয়, তৎপরে ১৯২১ সংবৎসরে কলিকাতা সংস্কৃত কালেজের ব্যাকরণশাস্ত্রের প্রধান অধ্যাপক পূজ্যপাদ শ্রীযুক্ত তারানাথ তর্কবাচস্পতি ভট্টাচার্য্য মহাশয় উহা পুনর্মুদ্রিত করেন। এক্ষণে উভয়ই প্রায় নিঃশেষিত হইয়া গিয়াছে। আমি শ্রীযুক্ত বাবু বরদাপ্রসাদ মজুমদার মহাশয়ের প্রার্থনায় ইহার টীকা করিয়া তাঁহাকে দিলাম। সংস্কৃতকালেজের পুস্তকালয়ে এক খানি হস্তলিখিত পুস্তক ও পূর্ব্বমুদ্রিত দুই খানি পুস্তক এই কয়েক খানি পুস্তক আদর্শস্বরূপ করিয়া রত্নাবলীর সংস্করণ করিলাম। আমি পাঠার্থীদিগের সাহায্যার্থ সমুদয় কঠিন স্থলেরই ব্যাখ্যা করিয়া দিয়াছি ও মূলের নিম্নে প্রাকৃতের সংস্কৃত ব্যাখ্যাও নিবেশিত হইয়াছে। এক্ষণে ইহা সমাজে পরিগৃহীত হইলে আমার সমুদয় শ্রম সফল হয়।

কলিকাতা।
সংস্কৃত কলেজ।
২৮এ শ্রাবণ। ১২৭৮

শ্রীনৃসিংহচন্দ্র শর্ম্মা।

Notes.

[illegible] = Shambuvāgī [illegible]
[illegible] = [illegible]
[illegible] = [illegible]
[illegible] = [illegible]

Vātika has four stars
Śātaka " seven "
Prakaraṇa " ten "
Phalaka " five "
Bashful.

रत्नावली *

नाटिका †।

प्रथमोऽङ्कः।

पादाग्रस्थितया मुहुः स्तनभरेणानीतया नम्रताम्
शम्भोः सस्पृहलोचनत्रयपथं यान्त्या तदाराधने।
व्रीडात्या शिरसीक्षितः सपुलकस्वेदोद्गमोत्कम्पया
विश्लिष्यन् कुसुमाञ्जलिर्गिरिजया क्षिप्तोऽन्तरे पातु वः॥ ‡॥

---

* रत्नावली किल कविकुलचूडामणेः श्रीहर्षदेवस्य कृतिरिति प्रसिद्धा। इयं हि माधुर्य्येण सहृदयहृदयग्राहिणी उपरूपकेष्वष्टादशविधेषु नाटिकायाम् अन्तर्भवति। नायिकायाः सिंहलेश्वरदुहितुर्नाम्नैवास्या रत्नावलीति संज्ञा। तथाचोक्तं दर्पणकारैः। "नाटिकासट्टकादीनां नायिकाभिर्विशेषणम्। यथा रत्नावलीकर्पूरमञ्जर्यादीति"।

† नाटिकालक्षणं यथा तेनैवोक्तम्।

"नाटिका कृतवृत्ता स्यात् स्त्रीभाया चतुरङ्किका।
प्रख्यातो धीरललितस्तत्र स्यान्नायको नृपः॥
स्यादन्तःपुरसम्बद्धा सङ्गीतव्याकृताथवा।
नवानुरागा कन्यात्र नायिका नृपवंशजा॥
सम्भवेत्तत्र नेतायां देव्यास्तासेन शङ्कितः।
देवी पुनर्भवेत् ज्येष्ठा प्रगल्भा नृपवंशजा॥
पदे पदे मानवती तदृशः सङ्गमो द्वयोः।
दृष्टिः स्यात् कौशिकी खलविमर्षाः सन्धयः पुनः" इति॥

‡ शम्भोरित्यादि। पादयोश्चरणयोरग्रे अग्रभागे स्थितया दण्डायमानया, अतएव शम्भोः सकाशात् प्रागुत्तरत्वात् तद्गिरसि अञ्जलिप्रदानोत्सुकाया; पुनस्तत्र

अपिच।

औत्सुक्येन कृतत्वरा सहभुवा व्यावर्त्तमाना ह्रिया,
तैस्तैर्बन्धुवधूजनस्य वचनैर्नीताभिमुख्यं पुनः।
दृष्ट्याग्रे वरमात्तसाध्वसरसा गौरी, नवे सङ्गमे
संरोहत्पुलका हरेण हसता श्लिष्टा, शिवायास्तु वः॥ * ॥

सुतरामेव पादयोरग्रे स्थितत्वमावश्यकमिति भावः। स्तनयोर्भरेण भारेण गुरुत्वादिति भावः मुहुः पुनःपुनः (पौनःपुन्यक्रियाविशेषणमव्ययं) नम्रतां ईषन्नतत्वं आनीतया प्रापितया, प्रगाढ़यौवनोद्भेदेन पीनोन्नतस्तनाभ्यां लोकनम्रयेत्यर्थः। (नमधातोः रप्रत्ययेन नम्रेति पदं सिद्धम्।) तस्य शम्भोः, वरस्य आराधने पूजने पूजनकालदृत्यर्थः, (शम्भोः) शिवस्य स्पृहया इच्छया सह वर्त्तमानानां सस्पृहाणां लोचनानां नयनानां त्रयस्य (तस्य त्र्यम्बकत्वात्) विषयं पन्थानं, (लोचनत्रयपथम् इति 'ऋक्पूरब्धूः पथामानक्षे' इति पाणिनिसूत्रेण तत्पुरुषसमासे पथिनुशब्दात् अप्रत्ययेन सिद्धम्) यान्त्या प्राप्नुवत्या सान्निध्यात् त्रिभिरेव नयनैर्युगपत् दृश्यमानयेत्यर्थः, ह्रीमत्या शिवेन दृष्टतया लज्जावनतया (अस्त्यर्थे मतुप्) पुलकेन रोमाञ्चेन खेदेन, घर्म्मवारिणा, उत्कम्पेन वेपथुना च खेदरोमाञ्चवेपथुरूपैः सात्विकविकारैरित्यर्थः, सह वर्त्तमानया नायकाभिगमनजन्यलज्जया वपुषि विसृष्टसात्विकविकारयेत्यर्थः गिरिजया पार्व्वत्या (हनुजनोर्ड इति डप्रत्ययः) शिरसि (अर्थात् वरस्य शम्भोः) ईहित इष्टः, अर्पयितुमिति शेषः। कुसुमाञ्जलिः विस्रिध्यन् अभीष्टदेशात् शिरस इत्यर्थः स्खलन् अन्तरे मध्ये चिप्रो निचिप्रः सन् वो युष्मान् पातु रक्षतु। नवपरिणयविधौ वराय अञ्जलिप्रदानोद्यतायाः पार्व्वत्या वरेण सस्पृहदर्शनात् उद्भूतसात्विकविकारायाः वरशिरसि प्रदातुमभीष्टोऽञ्जलिर्लज्जवत्याः अभीष्टप्रदेशात् अन्तरे निपतन् युष्माकं शुभाय भवत्विति सङ्क्षेपतस्तात्पर्य्यम्।

* औत्सुक्येनेति। नवे सङ्गमे परिणयविधेः परमेव वरेण सह सङ्गमे सङ्गमकालदृत्यर्थः, औत्सुक्येन उत्सुकतया, उत्कण्ठयेत्यर्थः, आत्यन्तिकयेनेति यावत्। हेतौ तृतीया। कृता त्वरा वेगोऽभीष्टलाभार्थं विलम्बासहिष्णुत्वादित्याशयः यया, सा तथोक्ता त्वरमाणा द्रुतपादक्षेपं वरमभिगच्छन्नित्यर्थः किन्तु

अपिच।

संग्राप्तं मकरध्वजेन मथनं त्वत्तो मदर्थं पुरा,
तद्युक्तं वद मार्गगां मम पुरो निर्लज्ज वोढुस्व।
तामेवानुनयस्व भावकुटिलां हे क्षणकरुष्ठ ग्रहम्
मुञ्चेत्याह रुषा यमद्रितनया, लक्ष्मीश्च, पायात्स वः॥ * ॥

सह भूजन्म यस्यास्तया तथोक्तया सहजया नवबधूसुलभया तस्याः स्वभावसिद्धयेत्यर्थः (भूधातोः क्विपि भूरिति पदसिद्धिः) ह्रिया लज्जया व्यावर्त्तमाना पुनः पश्चात् प्रतिनिवर्त्तमाना मनसाग्रहातिशयस्य वर्त्तमानत्वेऽपि लज्जावशेन सखीजनानां समक्षं नाथमभिगन्तुं न शक्नुवतीत्यर्थः। पुनः पुनरपि तैस्तैः नवपरिणयां सुग्धां भर्त्तुरभिमुखं प्रेरयितुं स्त्रीभिः प्रयोजितैः प्रेषितैरित्यर्थः, बन्धूनां मातुलपुत्रादीनां वधूजनस्य स्त्रीजनस्य स्निग्धसखीजनस्येत्यर्थः वचनैर्वाक्यैः प्रेरणावाक्यैरिति यावत् आभिमुख्यं वरं प्रत्यभिमुखतां नीता प्रापिता। अथ अग्रे समक्षमेव वरं शिवं दृष्ट्वा निरीक्ष्य आत्तो गृहीतः (आङ्पूर्व्वक दाधातोः क्ते पदमिदं सिद्धम्।) साध्वसं भयं (साधु असति, अस+अच्।) रसश्चानुरागश्च यया सा भयानुरागवतीत्यर्थः, सात्त्विकविकारोदयात् संरोहन्पुलका उद्गच्छद्रोमाञ्चा गौरी पार्व्वती हसता चिरात् प्रियासमागमाह्लादेन सहासास्येन हरेण शिवेन, श्लिष्टा सादरमालिङ्गिता सती वो युष्माकं शिवाय मङ्गलाय अस्तु भवतु। एवम्भूता गौरी युष्माकं कल्याणं विदधात्विति भावः। अत्र पार्व्वत्याः मुग्धात्वं वर्णितम्।

* संग्राप्तमिति। अत्र श्लेषेण पार्व्वत्याः, लक्ष्म्याश्च स्वं स्वं नायकं प्रति परिहासोक्तिर्निबद्धा। तत्र प्रथमं पार्व्वतीपक्षे व्याख्या यथा। पुरा पूर्व्वस्मिन् काले यदाहं त्वत्प्रसादप्राप्त्यर्थं हिमालये तपस्यतस्तव परिचर्य्यायां प्रयत्नेन नियुक्ताभवं तदानीमित्यर्थः मकरध्वजेन मीनकेतनेन कामेनेति यावत् (पुष्पधन्वा रतिपतिर्मकरध्वज आत्मभूरित्यमरः) मदर्थं ममैव कारणात् त्वां वशीकर्त्तुं मम अभिलाषं पूरयितुमित्यर्थः, त्वत्तस्त्वत्काशात्। पञ्चम्यर्थे तसिल्। मथनं प्राप्तं विनाशो लब्धः तृतीयनयनविनिर्गतेन वह्निना मदर्थे भस्मावशेषं त्वया दग्धस्त्वमित्यर्थः। हे निर्लज्ज! निर्गतं लज्जा यस्यासौ तत्सम्बुद्धिः हे

लज्जाविरहितहृदय! मम पुरो ममैवाग्रे मत्समक्षमेवेति यावत् वक्रभिः स्त्रिभिः स्वर्गमर्त्यपातालरूपैर्मार्गैः पथिभिर्गच्छति या सा। गमेर्डः। तरोक्ता तिसृगंगा त्रिपथगा गङ्गेत्यर्थस्तां वोढुः (वहेस्तृच्) शिरसि वहमानस्य परिणेतुर्वा तव तत् कामविनाशनं युक्तं उपयुक्तं उचितमेवेत्यर्थः। मत्समक्षमेव मम सपत्नीं मन्दाकिनीं शिरसि धारयितुः त्वद्विधस्य निर्लज्जस्य पुरा यत् मम हितार्थं प्रयतमानस्य रतिपतेर्दहनं तत् सम्यक् स्वभावोचितमेवेति अलमधुना वृथानुनयचेष्टयेति भावः। हे! कृष्णः कालः कण्ठो यस्यासौ तत्सम्बुद्धिः हे नीलकण्ठ! (पुरा किल अमृतार्थं समुद्रमथनकाले तद्गर्भादुत्थितस्य हालाहलस्य पानात् तद्वलेन भगवतश्चिन्तयतश्च कण्ठो नीलवर्णतां प्राप ततश्च तस्य नीलकण्ठ इति संज्ञेति पौराणिकी वार्त्ता) यद्वं निर्बन्धं मत्प्रसादनायेत्यर्थः मुञ्च परित्यज मत्समक्षमेव गङ्गां शिरसि वहमानस्य तव मत्प्रसादननिर्बन्धो नितरां कापट्यमेवेत्यर्थः। भावेन स्वभावेन कुटिलां वक्रगतिं नदीत्वादित्यर्थः वक्रकृशवा मिति च ध्वन्यते, तामेव मत्समक्षमेव यां शिरसि वोढुं समर्थोऽसि तामेवेत्यर्थः, मत्सपत्नीं गङ्गामेव अनुनयस्व चाटुवचनेन प्रसन्नां कुरुष्व। मम पुरो ममैव सपत्नीं वोढुर्निलज्जस्य तव मां परित्यज्य तामेवाराधयितुं युक्तं किं पुनर्मत्प्रसादनविडम्बनयेति भावः। इति अनेन पूर्वोक्तेन प्रकारेण अद्रेर्हिमालयस्य दुहिता पार्वती रुषा रोषेण प्रणयकोपेनेति यावत् यं महादेवं आह उवाच स प्रसिद्धो देवो भगवान् पार्वतीशो वो युष्मान् पायात् अव्यात्। प्रियतमया एवं प्रणयकलहकाल उक्तः सुतरां प्रहृष्टान्तःकरणो भगवान् शिवो युष्माकं कल्याणं विधत्तामित्यर्थः।

पुरा किल हिमालयप्रस्थे तपस्यतो भगवतः कृत्तिवाससः समाधिभङ्गाय देवराजेनादिष्टो मकरकेतनः तत्रोपेत्य सम्मोहनं नाम कुसुमसायकं भगवति निचिक्षेप, ततश्च तद्वलेन क्षणमात्रं विकलहृदयेन भगवता पुनः प्रकृतिमादाय क्रोधभरेण तृतीयनयननिर्गतेन वह्निनासौ भस्मावशेषं अदाहीति पौराणिकी वार्त्तात्रानुसन्धेया।

प्रकारान्तरे व्याख्या यथा। पुरा पूर्वस्मिन् काले मकरध्वजेन मीनचिह्नेन समुद्रेणेत्यर्थः मदर्थं ममैवार्थे समुद्रं मथित्वा मां अमृतमुद्धर्तुमित्यर्थः स्वयं रत्नाकराद् तवैवाप्तयेत्यर्थः मथनं विलोडनं प्राप्तमवाप्तम्। हे निर्लज्ज! सुरसागंगां वङ्गगामिनीं वेद्मीत्यर्थः कृत्वा मीनस्य दारौ इति शेषः

अपिच।

क्रोधेद्धैर्दृष्टिपातैस्त्रिभिरुपशमिता वक्रयोऽमी त्रयोऽपि
त्रासात्तां ऋत्विजोऽध्वर्यवलगणकृतोष्णीषपट्टाः पतन्ति।
दक्षः स्रौत्यस्य पत्नी विलपति कृपणं विद्रुतं चापि देवैः
ध्वंसन्नित्याट्टहासो मखमथनविधौ पातु देव्यै शिवो वः॥ *॥

बोढुः उपपत्नीत्वेन ग्रहीतुरस्य तत् कार्यं युक्तं उचितं मदुद्धरणार्थं समुद्र-मन्थनार्थं तदानीं ताडशनिर्वन्धातिशयप्रतस्तस्याधुना धर्मपत्नीं मां परित्यज्य लज्जाविरहितहृदयस्य वेश्याश्रयणं सम्यक् युक्तमेवेति काकुवक्रोक्तिः। अतः भावकुटिलां स्वभावेन कुटिलमतिं तामेव कुजामेव अनुनयन्न प्रसन्नां कुरुष्व। हे लक्ष्मण! कण्ठपदं मत्कण्ठपदं मुञ्च परित्यज। इत्था ते मत्प्रसादनप्रयास इत्यर्थः। इत्येवंप्रकारेण लक्ष्मीः (च अव्ययं) रुषा प्रणय-रोषेण यं कृष्णं आह उवाच स प्रसिद्धो भगवान् कृष्णो वो युष्मान् पायात् युष्माकं मङ्गलं विधत्तामित्यर्थः। "अवौ तन्त्री तरी लक्ष्मी स्त्रीधी श्रीणासुषादितः। स्त्रीलिङ्गे वर्त्तमानानां न सेर्लोपः कदाचनेति," उक्ते लक्ष्मी-रिति सकारस्य प्रथमैकवचनपदम्। पुरा किल अमृतोद्धरणार्थं देवैरसुरैश्च समवेत्य जलधिर्मथ्यमन्ये, मथ्यमानस्य च जलनिधेः लक्ष्मीरुदतिष्ठदिति पौराणिकी वार्त्ता। तथाच महाभारते आदिपर्व्वणि अमृतमन्थने।

"ते मन्थयितुमारब्धा स्तम्भासीना दिवौकसः।
अमृताय समागम्य तपोनियमसंयताः॥
तत्र नारायणो देवो ब्रह्माणमिदमब्रवीत्।
चिन्तयतु सुरेष्वेवं मन्थयतु च सर्व्वशः॥
दैवैरसुरसंङ्घैश्च मथ्यतां कलशोदधिः" इत्यादि।
श्रीरत्नैरप्सरोभिश्च हृतात् पाण्डरवासिनो" इति च॥

श्लोकेऽस्मिन् श्लेषोऽलङ्कारः।

*क्रोधेद्धैरिति। क्रोधेन कोपेनाग्निनेति यावत् इद्धैः प्रज्वलितैः (इन्धधातोः क्तप्रत्यये इद्धमिति पदं सिद्धम्) त्रिभिः दृष्टिपातैः दृष्टिविक्षेपैः नयनत्रयविनिर्गतैरग्निस्फुलिङ्गैरिव प्रज्वलद्भिस्त्रिभिर्दृष्टिपातैरित्यर्थः। अमी प्रत्यक्षं अवलम्बाः त्रयोऽपि त्रिविधा अपि दक्षिणगार्हपत्याहवनीयाख्या अग्नयः

किञ्च।

जितमुडुपतिना नमः सुरेभ्यो द्विजवृषभा निरुपद्रवा भवन्तु।
भवतु च पृथिवी सदृद्धसस्या प्रतपतु चन्द्रबपुर्नरेन्द्रचन्द्रः * ॥

वह्नयः अग्नयः उपशमिता उपशमं नीताः निर्वापिता इति यावत्, त्रासेन भयेन भीमवीरभद्ररूपदर्शनजातबलभयेनेत्यर्थः आर्त्ताः पीड़िताः (आङ्पूर्वक ऋधातोः क्तप्रत्यये आर्त्तमिति पदम्) ऋत्विजः यज्ञकर्म्मणि वृताः पुरोहिताः (ऋतौ यजन्ति ये ते इति वाक्येन ऋतुशब्दात् यजधातोः क्विप्प्रत्ययेन ऋत्विक् इति पदम्, यथोक्तं मनुना

"अग्न्याधेयं पाकयज्ञानग्निष्टोमादिकान् मखान्।
यः करोति वृतो यस्य स तस्यर्त्विगिति स्मृतः" इति ॥ १ ॥

चपलैश्चञ्चलैर्दुर्विनीतैरिति यावत् गणैः मम पारिषदैः प्रमथगणैरित्यर्थः धृताः बलेन गृहीताः उष्णीषपट्टाः शिरोवेष्टनवस्त्राणि येषां ते तथाभूताः सन्तः (उष्णीषते हिनस्ति इति वाक्येन उष्णशब्दात् ईषधातोः क्तप्रत्ययेन उष्णीषमिति।) अधः स्वस्वेदिभ्योऽधोभूमौ पतन्ति। दक्षः प्रजापतिः स्तौति मत्प्रसादनार्थं स्तवं करोतीत्यर्थः। अस्य दक्षस्य पत्नी भार्य्या क्रपणं दीनं विलपति सर्व्वनाशापातदर्शनात् अतिमात्रं भीता रोदितीत्यर्थः देवैः यज्ञसाधनार्थमाहूतैरुपस्थितैः अन्यैर्ब्रह्मादिभिरपि विद्रुतं पलायितं अत्याहितदर्शनादिति शेषः (विपूर्व्वात् द्रुधातोर्भावे क्तः) इति एवं प्रकारेण मखमथनविधौ, दक्षयज्ञविनाशंव्यापारे यज्ञध्वंसव्यापारमधिकृत्येत्यर्थः मखमथनविधावित्यत्र विषये सप्तमी, देव्यै स्वभार्य्यायै गौर्य्यै इत्यर्थः भंसन् कथयन् अट्टेनातिशयेन हासो यस्य स तथाविधः उच्चैर्हसन्नित्यर्थः देवो महेशः वो युष्मान् पातु रक्षतु युष्माकं कल्याणं विदधात्वित्यर्थः। आत्तहास इति पाठे आत्तो गृहीतो हासो येन स तथोक्त इत्यर्थः। पुरा किल भगवान् महेशो दक्षेण स्वयज्ञे अनिमन्त्रितोऽत्यर्थमवज्ञातः सन् रोषवशेन दुर्विनीतैः प्रमथगणैः सह वीरभद्रं प्रेष्य तेनैव तदीययज्ञं व्यनाशयदिति पौराणिकी वार्त्तात्रानुसन्धेया। चापि देवैरित्यत्र क्षौणिदेवैरिति वा पाठः। क्षौणिदेवैर्ब्राह्मणैरित्यर्थः। क्रपणमित्यत्र कृपणमिति पाठान्तरम्। धूर्जटिः पातु युष्मान् इति पाठान्तरम्।

* जितमिति। उडुपतिना नक्षत्रेन्द्रेण चन्द्रेणेति यावत् जितं जयो

नान्द्यन्ते * सूत्रधारः †

लब्धः, तस्य सर्व्वोत्कर्षेण वर्त्तमानत्वात् जयलाभो जात इति भावः । जिधातो-र्भावे क्तः । सुरेभ्यो देवेभ्यो नमः देवान् नमस्कुर्म्म इत्यर्थः । नमःशब्दयोगेन देवेभ्य इति चतुर्थी । द्विजदृषभाः द्विजपुङ्गवाः ब्राह्मणा इत्यर्थः, निरुप-द्रवा उपद्रवशून्या भवन्तु, निर्विपदो भवन्त्वित्यर्थः । पृथिवी च सदृशस्या सदृशशालिनी भवतु पृथिव्याः शस्यसदृद्धिः सुतरां वर्द्धतामित्यर्थः चन्द्रस्य यपुरिव वपुः शरीरं यस्य स तथोक्तः चन्द्रसदृशशरीरकान्तिशालीत्यर्थः नरेन्द्रचन्द्रः राजश्रेष्ठः श्रीहर्षश्च प्रतपतु स्वप्रतापं दिक्षु विस्तरतु सर्व्वोत्कर्षेण वर्त्ततामित्यर्थः ।

* नान्द्यन्ते इति । नान्दीपाठानन्तरं श्लोकानिमान् सूत्रधारः पठितवा-नित्यर्थः ।

नान्दीस्वरूपं यथा ।

"आशीर्वचनसंयुक्ता नित्यं यस्मात् प्रयुज्यते ।
देवद्विजनृपादीनां तस्मान्नान्दीति संज्ञिता ॥
मङ्गल्यशङ्खचन्द्राब्जकोकैरवशंसिनी ।
पदैर्युक्ता ह्यादशभिरष्टाभिर्वा पदैरुतेति" ॥

† सूत्रधार इति । सूत्रं नाटककथासूत्रं धारयति प्रथमं सूचयति यः सूत्रधार इत्यर्थः ।

चतुरातोद्यनिष्णातो नैकभूषासमाहृतः
नानाभाषणतत्त्वज्ञो नीतिशास्त्रार्थतत्त्ववित् ।
वेश्योपचारचतुरो पौरेज्ञविचक्षणः
नानागतिप्रकारज्ञो रसभावविशारदः ।
नाट्यप्रयोगनिपुणो नानाशिल्पकलान्वितः ।
छन्दोविधानतत्त्वज्ञः सर्व्वशास्त्रविचक्षणः ।
व्यवहारप्रयोक्ता च योक्तृणामुपदेशकः ।
एवं गुणगणोपेतः सूत्रधारो विधीयत' इति ।

सूत्रधारलक्षणं मातृगुप्ताचार्य्यैर्विस्तरतः कथितम् ॥

सूत्र। अलमतिप्रसङ्गेन *। अद्याहं वसन्तोत्सवे † सुबङ्गमानमाहूय, नानादिग्देशागतेन राज्ञः श्रीहर्षदेवस्य ‡ पादपद्मोपजीविना राजसमूहेनोक्तः। यथास्मत्स्वामिना श्रीहर्षदेवेनापूर्ववस्तुरचनालङ्कृता रत्नावली नाम नाटिका कृतेत्यस्माभिः श्रोत्रपरम्परया श्रुता, नतु प्रयोगतो ‡ दृष्टा, तत्तस्यैव राज्ञः सकलजनहृदयाह्लादिनो बङ्गमानादस्मासु चानुग्रहबुद्ध्या यथावत्प्रयोगेण त्वया नाटयितव्येति §। परिक्रम्यावलोक्य च। तदावद्दिह्यानीं नेपथ्यरचनां ¶ कृत्वा, यथाभिलषितं सम्पादयामि। परिषदमवलोक्य। अये आवर्जितानीव + सकलसामाजिकानां मनांसीति मे निश्चयः। यतः

श्रीहर्षो निपुनः कविः परिषदप्येषा गुणग्राहिणी
लोके हारि च वत्सराजचरितं, नाट्ये च दक्षा वयम्।

---

* अलमिति। अतिप्रसङ्गेन लक्ष्यमतिक्रम्य गमनेन अतिविस्तरेणेति यावत्। अलं योगेन तृतीया।

† वसन्तोत्सवे इति। वसन्तकालप्रसिद्धकामपूजनहोलाकादौ उत्सव इत्यर्थः।

‡ श्रीहर्षदेवस्य, श्रीहर्षदेवनाम्नः काश्मीराधिपतेः। विक्रमादित्यादधः पञ्चाशदधिकशततमसम्वत्सरे श्रीहर्षः काश्मीरराजसिंहासनमारुरोहेति काश्मीरराजतरङ्गिणीपाठेनावगन्तव्यम्।

‡ प्रयोगतः, अभिनयेनेत्यर्थः।

§ नाटयितव्या, अभिनेतव्या।

¶ नेपथ्यरचनामिति। नेपथ्यं जवनिकान्तरितं वर्धिकाप्रभृत्यादियोग्यं नटवर्गस्थानं, रङ्गाद्बहिर्भूषणस्थानमित्यर्थः। तस्य रचनां संस्थापनमित्यर्थः।

+ आवर्जितानि आकृतानि। सामाजिकानां समाजे कुशलानां, रसभावादिविशेषज्ञानां नाट्यदर्शनार्थमुपस्थितानां प्रमातृणामित्यर्थः।

वत्सैकैकमपीह वाञ्छितफलप्राप्तेः पदं, किं पुन
र्भाग्योपचयादयं समुदितः सर्व्वो गुणानां गणः ॥ * ॥
तद्यावदहं गृहं गत्वा गृहिणीमाह्वय, सङ्गीतकमनुतिष्ठामि

* श्रीहर्ष इति। श्रीहर्षः काश्मीरदेशाधिपोऽस्माकं महाराजः श्रीहर्ष देवः, निपुणो दक्षः प्रवीण इति यावत्, कविः कवयिता, असामान्यकवित्व शक्तिसम्पन्नोऽस्माकं महाराज इत्यर्थः अतस्तत्प्रणीतरत्नावलीनाटिकाभिनयन मवश्यमेव सामाजिकेभ्यः कमपि अनिर्व्वचनीयमानन्दरसं प्रदास्यतीत्यस्माकं निश्चय इत्याशयः। एषा परिषत् सभापि गुणग्राहिणी अभिनेतव्यकाव्य रसस्य सम्यक्ग्रहणसमर्था। दर्शकाः श्रोतारश्चास्माकं सर्व्व एव सहृदया अतोऽपि रत्नावल्यभिनयनं प्रीतिकरं भविष्यतीति भावः। वत्सराजस्य उदयनस्य चरितं कथा लोके हारि मनोहारि च, वत्सराजचरितं लोकैः अत्यर्थं आदरेण श्रूयते, अतो रत्नावल्यां तच्चरितनिबन्धनात् तदभिनयनं सर्व्वेषामेव आह्लादकरमवश्यमेव भविष्यतीति तात्पर्यम्। वयं च नाटयितुं प्रवृत्ता नटादयोऽस्माकमधिकृता जना अभिनेतार इत्यर्थः, नाट्ये अभिनयनकर्म्मणि दक्षाः कुशलाः इदमपि रत्नावल्यभिनयस्य प्रीतिप्रदत्वे कारणान्तरमिति भावः। अतएव इह विषये एकैकमपि श्रीहर्षप्रणीतनाटिकाभिनयनं, श्रोतृणां दर्शकानाञ्च गुणग्राहित्वं, श्रीवत्सचरितस्य मनोहरत्वं, नटानामस्माकं कार्य्यदक्षत्वमित्येतेषां कारणानां एकैकमपि वाञ्छितस्य अभीष्टस्य फलस्य परिषन्मनोहरणरूपस्य प्राप्तेः पदं स्थानं निदानं इत्यर्थः एतेषां कारणानां एकैकमेव जनमनोहरणार्थं अपेक्षितं सत् समवाय इत्यर्थः। मम भाग्यस्य उपचयात् वृद्धेः सत्सुभाग्यवशादित्यर्थः अयं पूर्व्वोक्तप्रकारः सर्व्वो निखिलः अशेष इति यावत् गुणानां गणः समूहः समुदितः समवेतः किं पुनः अवश्यमेव वाञ्छितं फलं प्रदास्यतीत्यर्थः अतोऽवश्यमेव रत्नावलीदर्शनं सामाजिकानां सम्यक् प्रीतिप्रदं भविष्यतीति भावः। श्रीहर्षस्य काश्मीराधिपतेः कवित्वकीर्त्तिसम्पन्नत्वे प्रमाणं यथा कल्हणप्रणीतराजतरङ्गिण्याः सप्तमे तरङ्गे।

अत्रान्तरे राजसूनुर्हर्षः सोत्कर्षपौरुषः
गुणैर्लेभे प्रकाशत्वमन्यभूपालदुर्लभैः।
सोऽशेषदेशभाषाज्ञः सर्व्वभाषासु सत्कविः
कृतज्ञविद्यानिधिः प्राप ख्यातिं देशान्तरेष्वपीति॥"

परिक्रम्य नेपथ्याभिमुखमवलोक्य * च। इदमसाधीयं गच्छं यावत्प्रविशामि। प्रविश्य उच्चैः। आर्ये, दूतस्तावत्।

प्रविश्य नटी। अज्जउत्त इअम्हि, आणवेदु अज्जो, को णिओओ अणुचिट्ठीअदुत्ति (१)

सूत्र। आर्ये रत्नावलीदर्शनोत्सुकोऽयं राजलोकः, तद्गत्वानतां नेपथ्यम्।

नटी। निश्चित्य सावेगम्†। अज्ज, णिच्चिन्तो दाणिं सि तुमं; ता कीस ण णच्चसि; मह उण मन्दभाआए एका जेव्व दुहिदा, सावि तुए कहिंवि देसन्तरे दिण्णा, कहं एवं दूरदेसट्ठिदेण भत्तुणा सह से पाणिग्गहणं भविस्सदित्ति, इमाए चिन्ताए अप्पावि मे ण पडिभादि; ता किं उण णच्चिदव्वं (२)।

सूत्र। आर्ये दूरस्थेनेत्यलमुद्वेगेन। पश्य

द्वीपादन्यस्मादपि मध्यादपि जलनिधेर्दिशोऽप्यन्तात्।
आनीय झटिति घटयति विधिरभिमतमभिमुखीभूतः॥ ‡॥

---

(१) आर्यपुत्र! इयमस्मि आज्ञापयतु, आर्यः को नियोगः अनुष्ठीयतामिति।

(२) आर्यपुत्र! निश्चिन्त इदानीमसि त्वं, तस्मात्कथं न नृत्यसि? मम पुनर्मन्दभाग्यायाः एकैव दुहिता, सापि त्वया देशान्तरे दत्ता, कथमेवं दूरदेशस्थितेन भर्त्रा सह तस्याः पाणिग्रहणं भविष्यतीति, अनया चिन्तया आत्मापि मे न प्रतिभाति, तत् किं पुनर्नर्त्तितव्यम्।

---

* नेपथ्यं नी विच् नियः नेतुः पथ्यं अभिनयनापेक्षितवेशभूषादिकमित्यर्थः।

† सावेगं। सदुःखप्रकाशम्।

‡ द्वीपादिति। द्विर्गता आपो यस्मिन् तत् द्वीपं "द्यन्तरुपसर्गेभ्योऽपरेत्" इति णिनिप्रत्ययात्। अन्यस्मात् द्वीपात् अत्र सिंहलद्वीपादित्यर्थः। जलनिधेः

नेपथ्ये। साधु भरतपुत्र * साधु, एवमेतत् कः सन्देहः। द्वीपादित्यादि पुनः पठति।

सूत्र। आकर्ण्य नेपथ्याभिमुखमवलोक्य। आर्ये, किमतःपरं, विलम्बसे; नन्वयं मम यवीयान् भ्राता, गृहीतयौगन्धरायणभूमिकः † प्राप्त एव तदेहि नेपथ्यग्रहणाय सज्जीभवावः ‡। इति विष्क्रान्तौ।

प्रस्तावना ¶

सम्प्रदर्श। झटिति शीघ्रम्। घटयति योजयति। विधिर्दैवम्। अभिमतं अभीष्टं वस्तु जनं वा। अभिसुखीभूतः, अनभिसुखोऽभिसुखीभूतः इति अभूततद्भावे च्विः। अनुकूल इत्यर्थः।

* भरतपुत्रेति। हे मुनेर्भरतस्य नाट्यशास्त्रोद्भावयितुः पुत्र! भरतपुत्रपदस्य भाटकाभिनेटनटादिपरत्वमर्थादायाति।

† गृहीता यौगन्धरायणस्य भूमिका वेषो येन स तथोक्तः। स्ववेषं परित्यज्य अभिनयनार्थं गृहीतयौगन्धरायणवेष इत्यर्थः। अन्यरूपैर्यदन्यस्य प्रवेशस्तत्र भूमिकेति लक्षणात्। यौगन्धरायणः श्रीवत्सस्य राज्ञः प्रधानामात्यः।

‡ वयमप्यनन्तरकरणीयवेशवशेनापरभूमिकया सज्जीभवाम इति पाठान्तरम्।

¶ प्रस्तावनेति।

नटी विदूषको वापि पारिपार्श्विक एव वा।
सूत्रधारेण सहिताः संलापं यत्र कुर्वते॥
चित्रैर्वाक्यैः स्वकार्योत्थैः प्रस्तुताक्षेपिभिर्मिथः।
आमुखं तत्तु विज्ञेयं नाम्ना प्रस्तावनापि सा॥ इति साहित्यदर्पणे।

प्रस्तावना पञ्चविधा। सूत्रधारवाक्येन पात्रप्रवेशादत्र कथोद्घातनामा-प्रस्तावनाभेदः।

सूत्रधारस्य वाक्यं वा समादार्थमस्य वा
भवेत् पात्रप्रवेशश्चेत् कथोद्घातः स उच्यते इति लक्षणात्॥

ततः प्रविशति यौगन्धरायणः।

यौग। एवमेतत् कः सन्देहः। द्वीपादिति पुनः पठित्वा। अन्यथा * क्व सिंहादेशजनितप्रत्ययप्रार्थितायाः सिंहलेश्वरदुहितुः समुद्रे यानभङ्गनिमग्नायाः फलकासादनं †? क्व च कौशाम्बीयेन वणिजा सिंहलेभ्यः प्रत्यागच्छता तदवस्थायाः सम्भावनं रत्नमालाचिह्नायाः प्रत्यभिज्ञानात् दृष्टानयनञ्च॥ सहर्षम्॥ सर्व्वथा स्पृशन्ति नः स्वामिनमभ्युदयाः॥ विचिन्त्य॥ यथापि चैनां देवीहस्ते सगौरवं निक्षिपता युक्तमेवानुष्ठितं; श्रुतञ्च मया, वाभ्रव्योऽपि कञ्चुको सिंहलेश्वरामात्येन वसुभूतिना सह कथं कथमपि समुद्रादुत्तीर्य्य, कोशलोच्छित्तये गतवता रूमण्वता ‡ मिलित इति। तदेवं निष्पन्नप्रायमपि प्रभुप्रयोजनं, न मे धृतिमावहतीति §कष्टोऽयं खलु भृत्यभावः। यतः

प्रारम्भोऽस्मिन् स्वामिनो दृष्टिहेतौ
दैवेनेत्थं दत्तहस्तावलम्बे।
सिद्धे भ्रान्तिर्नास्ति सत्यं, तथापि
स्वेच्छाचारी भीत एवास्मि भर्तुः॥ ¶॥

---

* अन्यथा दैवप्रसादमन्तरेणेत्यर्थः।

† फलकासादनं काष्ठखण्डप्राप्तिः। कौशाम्बीयेन कौशाम्बीवासिना। वत्सराजस्य राजधानी कौशाम्बीत्याख्यातासीत्। सम्भावनं सत्कारः।

‡ रूमण्वता सेनापतिना।

§ धृतिं तुष्टिम्। आवहति जनयति।

¶ प्रारम्भ इति। स्वामिनः प्रभोः महाराजवत्सस्य दृष्टेरभ्युदयस्य हेतौ कारणे अस्मिन् प्रारम्भो राज्ञो भविष्यदभ्युदयसूचके रत्नावलीलाभरूप इत्यर्थः। इत्थमनेन प्रकारेण दैवेन विधिना दत्तहस्तावलम्बे अभिमुखीभूतेन विधिना

नेपथ्ये कलकलः ॥ आकर्ण्य । अये मृदुरभिहन्यमानमृदु-मृदङ्गानुगतसङ्गीतमधुरः पुरः पौराणामुच्चरति चर्चरीध्वनिः, तथा तर्कयामि यदेनं मदनमहमहीयांसं * पुरजनप्रमोदमवलोकयितुं प्रासादाभिमुखं प्रस्थितो देव इति। ऊर्ध्वमवलोक्य। अये, कथमधिरूढ एव देवः प्रासादम्। य एवः,

विश्रान्तविग्रहकथो रतिमान् जनस्य
चित्ते वसन् प्रियवसन्तक एव साक्षात्।
पर्य्युत्सुको निजमहोत्सवदर्शनाय
वत्सेश्वरः कुसुमचापइवाभ्युपैति ॥ † ॥

प्रदत्तसाहाय्ये सति सिद्धे कार्य्यसाधनविषये राज्ञः सुखसम्पद्विवर्द्धनरूपकार्य्यसाधनविषये (अस्मिन् प्रारम्भे सिद्धे अस्य प्रारम्भस्य भविष्यत्सिद्धिविषय इति वार्थः।) मम भ्रान्तिः सन्देहो नास्ति इति सत्यम्, अनुकूलेन विधिनावश्यमेव अभ्युदयोन्मुखं राज्यं सुखसम्पद्विसम्पन्नं विधास्यत इति मया अनुमीयते इत्यर्थः। तथापि भृत्यभावात् स्वेच्छाचारी विना राज्ञ आज्ञां स्वयं कार्य्येषु प्रवृत्तोऽहं भर्तुः स्वामिनः भीत एव सदाभीत एव अस्मि। सततं हितचिन्तनपरस्यापि मम कार्य्याणि महाराजेन अनुमोदितानि भविष्यन्ति न वेत्याशङ्कया सदैव व्याकुलं मे हृदयमिति भावः।

* मदनेति। मदनस्य कामदेवस्य महे उत्सवे वसन्तोत्सवे महीयांसं गुरुतरम्।

† विश्रान्तेति। वत्सेश्वरः वत्सराजः निजमहोत्सवदर्शनाय स्वकीयवसन्तोत्सवदर्शनार्थं पर्य्युत्सुकः वसन्तोत्सवदर्शनोत्सुक इत्यर्थः कुसुमचापः पुष्पधन्वा कामः इव अभ्युपैति आगच्छति। स्वभावसिद्धसौन्दर्य्येण वसन्तोत्सवोचितवेशेन च अत्यर्थं शोभमानो महाराजः साक्षात् कामदेव इव लक्ष्यते इत्यर्थः। किम्भूतः विश्रान्ता शत्रुराहित्यात् विरता विग्रहस्य युद्धस्य कथा वार्त्ता यस्य स तथोक्तः वसन्तोत्सवेन परित्यक्तयुद्धकथ इति वार्थः कामोपि विश्रान्ता निवृत्ता विग्रहस्य शरीरस्य कथा यस्मात् स हरनयनविनिर्गतज्योतिषा भस्मीभूतत्वेन तस्य अनङ्गत्वादित्यर्थः। पुनः किम्भूतः रतिमान् प्रगाढप्रणयवान् कामश्च रतिमान् रतिपतिः। पुनः

तद्यावदहं गत्वा, कार्य्यशेषं चिन्तयामि। इति निष्क्रान्तः।

विष्कम्भकः। *।

ततः प्रविशत्यासनस्थो गृहीतवसन्तोत्सववेषो राजा विदूषकश्च।

राजा। सहर्षमवलोक्य। सखे वसन्तक।

विदू। आणवेदु भवं। इदमासनमलङ्करोतु भवान्।

राजा।

राज्यं निर्जितशत्रु, योग्यसचिवे न्यस्तः समस्तो भरः,
सम्यक्पालनलालिताः प्रशमिताशेषोपसर्गाः प्रजाः।
प्रद्योतस्य सुता, वसन्तसमयस्वच्चेति नाम्ना धृतिम्
कामः कामसुपैत्वयं मम पुनर्मन्ये महानुत्सवः॥ ‡॥

किम्भूतः जनस्य प्रजालोकस्य चित्ते वसन् हृदयग्राही, कामश्च जनस्य लोकस्य चित्ते वसन् मनसिज इत्यर्थः। पुनः किम्भूतः साक्षात् प्रियो वसन्तकः वसन्तकनामा विदूषको यस्य वसन्तकेन सख्या सदा सङ्गत इत्यर्थः कामस्य प्रियवसन्तकः प्रियो वसन्तो वसन्तकालो यस्य स तथोक्तः। श्लेषोलङ्कारः।

* विष्कम्भ इति।

वृत्तवर्त्तिष्यमाणानां कथांशानां निदर्शकः।
संक्षिप्तार्थस्तु विष्कम्भ आदावङ्कस्य दर्शित इति साहित्यदर्पणे॥

‡ राज्यमिति। राज्यं कौशाम्बीराज्यं निर्जिताः निःशेषेण जिताः पराजिताः शत्रवो यस्य तत् उद्भटशत्रुकण्टकमित्यर्थः। समस्तः अखिलः भरो भारः सन्धिविग्रहादिपर्य्यालोचनादिराजकार्य्यस्य गुरुभारः योग्ये राजकार्य्यभारवहनसमर्थे कार्य्यदक्षे इत्यर्थः सचिवे मन्त्रिणि यौगन्धरायणे न्यस्तः अर्पितः यौगन्धरायणस्य विचक्षणत्वात् तद्विन्यस्तसमस्तभारः सन् निश्चिन्तोऽहमिति भावः। प्रजाः प्रकृतयः सम्यक् पालनेन सुष्ठुपालनेन रत्नेन लालिताः अनुद्वेजिताः अपत्यनिर्विशेषं पालिता इत्यर्थः, तथा प्रशमिताः प्रशमं नीताः अशेषाः निःशेषाः उपसर्गाः उत्पाता उपद्रवा इति यावत् विपद इत्यर्थः येषां ते तथोक्ता निर्विपद इत्यर्थः। प्रद्योतस्य राज्ञः सुता दुहिता, मम महिषी

विदू॰सहर्षम्। भो वअस्स, एवं णेदं। अहं उण जानामि ण भवदो, ण कामेदवस्स, मम ज्जेव्व एकस्स बम्हणवडुअस्स अअं मअणमहूसवो, जस्स किदे पिअवअस्सेण एवं मन्तीअदि। विलोक्य। ता किं दूमिणा, पेक्ख दाव दूमस्स मङ्गमत्तकामिणीजणसअंगाहगहिदणच्चन्तणाअरजणजणिदकोदूहलस्स, समन्तदो संवुत्तमहलोहामचच्चरीसद्दमुहररत्थासुहसोहिणो, पइण्णपंडवासपुञ्जपिञ्जरिददहदिसामुहस्स, सम्मीकदं मअणमहूसवस्स (१) *।

---

(१) भो वयस्य एवं न्विदम्। अहं पुनर्जानामि, न भवतो, न कामदेवस्य, ममैव एकस्य ब्राह्मणवटुकस्य अयं मदनमहोत्सवो, यस्य कृते प्रियवयस्येनैवं मन्त्र्यते। तत् किं पुनरनेन; प्रेक्षस्व तावदस्य मधुमत्तकामिनीजनस्वयंग्राहगृहीतनागरजनजनितकौतूहलस्य, समन्ततः संवृत्तमहालोहामचर्चरीशब्दमुखररथ्यासुखशोभिनः, प्रकीर्णपटवासपुञ्जपिञ्जरितदशदिङ्मुखस्य, सम्मीकृतं मदनमहोत्सवस्य।

असामान्यरूपगुणसम्पन्ना वासवदत्तेत्यर्थः। वसन्तसमयः वसन्तकालः स्वश्च रहस्यञ्च प्रियं मित्रं। सर्व्वमेतत् मम विद्यते इति शेषः। यत् यत् उपकरणं राज्ञः सुखायापेक्षितं तत् सर्व्वमशेषेण मदधीनमिति भावः। इति अतोहेतोः अयं प्रजाभि-रधुना पूज्यमानः कामः कुसुमायुधः मात्रा नाममात्रेणैव धृतिं तुष्टिं कामं पर्य्याप्तं उपैतु प्राप्नोतु नाममात्रेणैवायं आरब्धः कामस्योत्सव इत्यर्थः, मम पुनः मम तु याच्ञाप्येन महान् उत्सवो विद्यत इति भावः। प्रजाभिः सादरं पूज्यमानात् भगवतः कामादप्यहमधिकतरं सुखीति भावः।

* मधुमत्तेति। मधुना मधुपानेन मत्तैः कामिनीजनैः स्वयंग्राहं यथा तथा गृहीताः नृत्यन्तो ये नागरजनाः तैर्जनितं कौतूहलं यस्य तस्य तथोक्तस्य। मङ्गमत्तेत्यत्र, मङ्गमत्तकामिणीजणसअंगाहगहिदसिङ्गकजलप्पहारणच्चणेत्यादि पाठान्तरम्। स्वयंग्राहगृहीतनागरशृङ्गकजलप्रहारनृत्यदित्यादि सं।

राजा। सहर्षं समन्तादवलोक्य। अहो परां कोटिमधिरोहति * प्रमोदः पुरः पौराणाम्। तथाहि-

कीर्णैः पिष्टातकौघैः कृतदिवसमुखैः कुङ्कुमच्छोदगौरै
र्हैमालङ्कारभाभिर्भरनमितशिखैः शेखरैः किङ्किरातैः।
एषा वेश्माभिलक्ष्यस्वविभवविजिताशेषवित्तेशकोषा,
कौशाम्बी शातकुम्भद्रवखचितजनैवैकपीता विभाति ॥ † ॥

अपिच।

धारायन्त्रविमुक्तसन्ततपयःपूरप्लुते सर्वतः
सद्यः सान्द्रविमर्दकर्दमकृतक्रीडे क्षणं प्राङ्गणे।

---

* कोटिं-अग्रभागं उन्नतत्वं इत्यर्थः।

† कीर्णैरिति। कीर्णैः परितो विक्षिप्तैः (कृ धातोःक्तप्रत्यये कीर्ण इति पदं) कुङ्कुमच्छोदैः कुङ्कुमचूर्णैः मिश्रितैरितिशेषः गौरैः अरुणैः अतएव कृतं दिवसस्य मुखं प्रत्यूषो यैस्तैस्तथोक्तैः रक्तवर्णत्वात् अरुणोदयमिव कुर्वाणैरित्यर्थः पिष्टातकानां पटवासनार्थगन्धद्रव्यचूर्णानां ओघैः समूहैः, हैमालङ्काराणां सुवर्णनिर्मितभूषणानां कटककुण्डलादीनां भाभिः प्रभाभिः किरणैरिति यावत् तथा भरेण भारेण नमितशिखैः नम्रशीर्षैः कैङ्किरातैः किङ्किरातसम्बन्धिभिः शेखरैः शिखाभिः अशोकपुष्पगुच्छैः एभिः करणैः वेश्मना वासन्तालंकारादिना कृतेन रूपान्तरेण (किङ्किरां रक्तवर्णं अतति गच्छति अर्थात् पुष्पद्वारा इति अण् प्रत्ययेन किङ्किरात इति पदं) अभिलक्ष्येण लक्ष्यं लक्ष्यमाणेन स्वविभवेन स्वसम्पद्भा विजितः पराजितः अशेषः समग्रः वित्तेशस्य धनेशस्य कुबेरस्य कोषो धनागारो यया सा तथोक्ता कुबेरनगरीमलकामपि सम्पद्भा अतिक्रम्य शोभमानेति भावः एषा कौशाम्बी नगरी शातकुम्भद्रवैः हिरण्यद्रवैः खचिताः जनाः मानवाः यस्यां सा तथोक्ता सुवर्णखचितपौरजना इव एकपीता पीतवर्णा विभाति शोभते।

उद्दामप्रमदाकपोलनिपतत्सिन्दूररागारुणैः
सैन्दूरीक्रियते जनेन चरणन्यासैः पुरः कुट्टिमम् ॥ * ॥

विदू। विलोक्य। एदंपि दाव सुविअड्ढजणापूरिदहसिंगक-जलप्पहारमुक्कसिक्कारमणोहरं वारविलासिणीजणविलसिदं आलोएदु पिअवअस्सो (१)।

राजा। विलोक्य। वयस्य, सम्यक् दृष्टं त्वया।

कुतः। अस्मिन् प्रकीर्णपटवासकृतान्धकारे,
दृष्टोमनाङ्मणिविभूषणरश्मिजालैः।
पातालमुद्यतफणाकृतिरङ्गकोऽयम्
मामद्य संस्मरयतीव भुजङ्गलोकः ॥ † ॥

---

(१) इदमपि तावत् सुविदग्धजनापूरितहङ्गकजलप्रहारमुक्तशीत्कारमनोहरं वारविलासिनीजनविलसितं आलोकयतु प्रियवयस्यः।

---

* धारेति। जनेन नागरजनेन सर्व्वतः सर्व्वासु दिक्षु धारायन्त्रेभ्यः क्षिप्तजलवर्षणयन्त्रेभ्यः विसृष्टैः सन्ततैः निविड़ैः पयसां जलानां पूरैः समूहैः प्रवाहैरितिशेषः प्लुते व्याप्तैः सम्यक् सिक्तैः इत्यर्थः क्षणं क्षणिकालं व्याप्य सद्यः सान्द्रविमर्दे मिविड़विलोड़ने कर्दमे कृता क्रीड़ा यस्मिन् तस्मिन् तथोक्ते प्रथमं जलसेकात् ततः तदुपरि उद्दामक्रीड़ावशात् सान्द्रकर्दम इत्यर्थः प्रीङ्गणे रङ्गभूमौ (उठान) उद्दामां अप्रतिबन्धं उत्कटञ्च क्रीड़न्तीनां प्रमदानां स्त्रीणां कपोलेभ्यः गण्डेभ्यः निपतद्भिः पतनशीलैः सिन्दूररागैः करणैः अरुणैः रक्तवर्णैः चरणन्यासैः पादविन्यासैः पुरः कुट्टिमं प्राङ्गणमसृणभूमिं (चाताल) सैन्दूरीक्रियते सिन्दूरमयमिव विधीयते।

† अस्मिन्निति। अस्मिन् वर्त्तमाने प्रकीर्णैः समन्तात् विक्षिप्तैः पटवासैः पटवासनामैः चूर्णीकृतैर्गन्धद्रव्यविशेषैः कृते उत्पादिते अन्धकारे मणिविभूषणानां हीरकादिनिर्म्मितालंकाराणां रश्मिजालैः किरणसमूहैः करणैः मनाक् ईषत् दृष्टः उद्यतानि उन्नमितानि फणाकृतीनि फणाकृतिवत् (सिंधकिरि) येन स उन्नत

विदू * । विलोक्य । भो वयस्स, पेक्ख, पेक्ख, एसा क्खु मअ-णिआ मअणरसविसअदत्ताभिणआ णच्चन्ती, चूदलदाए सह दूदोजेव्व आअच्छदित्ति ता पेक्खदु भवम् (१)।

ततः प्रविशतो मदनलीलां नाटयन्त्यौ द्विपदीखण्डं गायन्त्यौ चेट्यौ।

मदनिका गायति।

कुसुमाउहप्पिअदूअओ, मउलाइदचूअओ
सिढिलिअमाणग्गहणओ वाअइ दाहिणपवणओ।
विवहिअवउलामोअओ, कंखिअपिअअणमेलओ
पडिवालणअसमत्थओ भमइ जुवईसत्थओ(२) ॥ † ॥

---

(१) भो वयस्य! पश्य पश्य, एषा खलु मदनिका मदनरसविषयदत्ताभिनया नृत्यन्ती चूतलतिकया सह दूत एवागच्छति तत्पश्यतु भवान्। भ्रमण-मरिसं वसन्ताभिणअं णच्चन्तीति पाठान्तरम्।

(२) कुसुमायुधप्रियदूतः, मुकुलायितचूतकः,
शिथिलितमानग्रहो वाति दक्षिणपवनकः।
वाहितबकुलामोदः काङ्क्षितप्रियजनमेलकः
प्रतिपालनासमर्थको भ्रमति युवतिसार्थः ॥

सितैः भृङ्गकैः फणविभिन्न इव लक्ष्यमाण इत्यर्थः अयं अयतो विहरणशीलः भुजङ्गलोकः वेश्यानां जारसमूहः अद्य मां पातालं संस्मारयतीव। गाढान्ध-कारारब्धकिरणभुजङ्गदर्शनेन भूलोकोऽपि पातालमिव मे प्रतिभातीति भावः। अत्र भुजङ्गशब्दः श्लिष्टः। तेन च श्लेषोऽलङ्कारः।

* विदूषकलक्षणं यथा साहित्यदर्पणे।

कुसुम्भवसनाद्यभिधः कर्म्मवपुर्वेषभाषाद्यैः।
हास्यकरः कलहरतिर्विदूषकः स्यात् सकर्म्मज्ञः ॥

† शिथिलितं शिथिलीकृतं मानग्रहणं युवतीनां मायकेषु प्रणयकोपग्रहणं येन, वसन्तागमे दक्षिणानिलस्य मदनोद्दीपकत्वेन स्त्रीणां मानग्रहणं सुदूर-मपास्तमिति भावः। आमोदो गन्धः। युवतिसार्थः युवतिसमूहः।

इह पढमं मऊमासो जणस्स हिअआइं कुणइ मिदुलाइं।
पच्छा विन्धइ कामो लक्खपसरेहिं कुसुमबाणेहिं (१) ॥ * ॥

राजा। निर्वर्ण्य। अहो मधुरोऽयमासां निर्भरः क्रीड़ारसः। तथाहि

स्रस्तः स्रग्दामशोभां त्यजति विरचितामाकुलः केशपाशः
क्षीवाया नूपुरौ च द्विगुणतरमिमौ क्रन्दतः पादलग्नौ।
व्यस्तः कम्पानुबन्धादनवरतमुरो हन्ति हारोऽयमस्याः
क्रीड़न्त्याः पीड़येव स्तनभरविनमन्मध्यभङ्गानपेक्षम् ॥ † ॥

विदू। सहासम्। भो वअस्स! अहम्पि एदाणं बद्धपरिअराणं मज्झे णच्चन्तो गायन्तो मअणमहूसवं माणइस्सं (२)।

---

(१) इह प्रथमं मधुमासो जनस्य हृदयानि करोति व्याकुलानि।
पश्चात् विध्यति कामो लक्ष्यप्रसरैः कुसुमबाणैः॥

(२) भो वयस्य! अहमप्येतासां बद्धपरिकराणां मध्ये नृत्यन्, गायन्, मदनमहोत्सवं सम्मानयिष्यामि।

---

* मधुमासः चैत्रमासः। लक्ष्यप्रसरैः लक्ष्यावकाशैः। निर्भरः अतिरिक्तः अतिशयित इति यावत्। क्रीड़ारसः क्रीड़ानुरागः।

† स्रस्त इति। आकुलः उद्दामक्रीड़ावशात् अतिमात्रं चञ्चलः केशपाशः स्रस्तः स्खलितः सन् स्रक्दाम्नः पुष्पमालायाः शोभां पुष्पमालाभूषणं त्यजति कुसुमदामानि कामिन्याः केशपाशात् स्खलन्तीति भावः। क्षीवायाः मत्तायाः वसन्तोत्सवे मधुपानात् मत्तायाः इमौ पादलग्नौ नूपुरौ द्विगुणतरमिव क्रन्दतः शिञ्जतः। तथा क्रीड़न्त्याः अस्याः कम्पानुबन्धात् अविश्रान्तनृत्यवशात् व्यस्तः चञ्चलः अयं हारः पीड़येव पीड़ामवाप्येव, स्तनभरेण स्तनयोर्भरेण विनमतो नमनशीलस्य मध्यस्य कटिभागस्य भङ्गे अनपेक्षं अनवधानं क्रूरमिवेत्यर्थः उरः अनवरतं अविरतं यथा स्यात् तथा हन्ति ताड़यति। बद्धपरिकराणां गाढ़गात्रबन्धानाम्।

राजा। सस्मितम्। वयस्य! एवं क्रियताम्।

विदू। जं भवं आणवेदि त्ति। उत्थाय तयोर्मध्ये नृत्यति। भोदि मअणिए, भोदि चूदलदिए, इदं चच्चरिअं मय्यि शिक्खावेध (१)।

मद। विहस्य। हदास, णच्च चच्चरी एषा द्विपदीखण्डं एदं (२)।

विदू। सहर्षम्। किं एदिणा खण्डेण मोअआ लड्डुआ वा करीअन्ति (३)।

मद। विहस्य। हदास! णहि, णहि, पढीअदि क्खु एदं (४)।

विदू। सविस्मयम्। पढीअदि क्खु एदं। सविषादम्। जइ पढीअदि, ण भुञ्जीअदि, ता मम एदिणा ण कज्जं। वरं पिअवअस्सस्स ज्जेव्व सआसं गमिस्सं (५)। तथा करोति। अपसृत्योपविशति।

उभे। आकर्षतः।

विदू। आकर्षयति §।

---

(१) भो मदनिके! भवति चूतलतिके! एतच्चर्चरीकं मामपि शिक्षयतम्।

(२) हताश! नहि चर्चरी एषा, द्विपदीखण्डमिदम्।

(३) भवति, एतेन खण्डेन किं मोदका लड्डुका वा क्रियन्ते।

(४) हताश, नहि, नहि, पठ्यते खल्वेतत्।

(५) पठ्यते खल्विदम्। यदि पठ्यते, न भुज्यते, तस्मान्ममैतेन न कार्यम्। वरं प्रियवयस्यस्य समीपं गमिष्यामि।

---

§ आकर्षयति। आत्मानमिति शेषः।

मद। हदास ! एहि ; कहिं गच्छसि, इधज्जेव्व कीलम्ह(१) इति बहुविधं ताड़यति।

विदू। आकृष्य हस्तं, प्रपलाय्य, राजानमुपसृत्य। भोवअस्स, अ णच्चिदोह्मि (२)।

राजा। वयस्य ! क्रीड़ितम्।

विदू। णहि कीलिअं पलाइदोम्हि (३)।

चूतलतिका। हञ्जे मअणिए ! चिरं खु अम्हेहिं कीलिदं, ता एहि, णिवेदेम्ह दाव भट्टिणीए सन्देसं महाराअस्स (४)।

मद। चूदलदिए सुट्ठु तुए सुमरिदं एदं एव्वं करेम्ह। परिक्रम्योपसृत्य च। उभे। जेदु जेदु भट्टा, देवी आणवेदि। इत्यर्द्धोक्तिं लज्जां नाटयन्त्यौ। णहि णहि, विण्णवेदि (५)।

राजा। सहर्षं विहस्य सादरम्। मदनिके ! नन्वाज्ञापयतीत्येव रमणीयं * विशेषतोऽद्य मदनमहोत्सवे। तदुच्यतां, किमाज्ञापयति देवी।

---

(१) हताश ! एहि ; कुत्र गच्छसि, इहैव क्रीड़ामः। चिट्ठ विणा कीलिअं हदास कहिं गच्छसि इति पाठोऽपि दृश्यते। तिष्ठ विना क्रीड़ितं हताश कुत्र गच्छसि इति सं०।

(२) भो वयस्य ! नर्त्तितोऽस्मि।

(३) नहि क्रीड़ित्वा पलायितोऽस्मि। क्रीड़ितं

(४) हञ्जे (सखि) मदनिके ! चिरं खल्वस्माभिः क्रीड़ितं, तस्मादेहि, निवेदयामो देव्याः सन्देशं महाराजाय।

(५) चूतलतिके सुष्ठु त्वया स्मृतं इदानीमेवं कुर्मः। जयतु जयतु भर्त्ता। राजन्, देवी आज्ञापयति।

---

* रमणीयं श्रवणसुखमित्यर्थः।

विदू। आः दासीए धीए, किंत्ति देवी आणवेदित्ति (१)।

चेडी। एवं भट्टिणी विण्णवेदि, जहा खु अज्ज मए मअरन्दुज्जाणं गदुअ, रत्तासोअपादवदलट्ठिदस्स भअवदो कुसुमाउहस्स* पूआ णिव्वत्तिदव्वा, तत्थ अज्जउत्तेण सण्णिहिदेण होदव्वं त्ति (२)।

राजा। वयस्य! किं वक्तव्यमुत्सवादुत्सवान्तरमापतितमिति†।

विदू। ता उट्ठेहि, तहिं ज्जेव गच्छम्ह, जेण तहिं गदस्स ममावि बम्हणबालअस्स सोत्थिवाअणं‡ किम्पि भविस्सदित्ति(३)।

राजा। मदनिके! गम्यतां, देव्यै निवेदयितुं अयमहमागत एव मकरन्दोद्यानमिति।

चेडी। जं भट्टा आणवेदित्ति (४)। इति निष्क्रान्ते।

---

(१) दास्याः पुत्रि! किमिति देवी आज्ञापयति।

(२) एवं देवी विज्ञापयति, यथा खलु अद्य मया मकरन्दोद्याने गत्वा, रक्ताशोकपादपतलसंस्थापितस्य भगवतः कुसुमायुधस्य पूजा निर्वर्त्तयितव्या, तत्र चार्यपुत्रेण सन्निहितेन भवितव्यमिति।

(३) भो वयस्य! तत्राकृत्तिष्ट, तत्रैव गच्छाम, येन तत्र गतस्य मे ब्राह्मणबालकस्य स्वस्तिवाचनं किमपि भविष्यतीति।

(४) यद्भर्त्राज्ञापयति।

---

* कुसुमायुधस्य कामदेवस्य।

† उत्सवात् वसन्तोत्सवात्। उत्सवान्तरं देव्याः कामदेवार्च्चनरूपम्। आपतितं उपस्थितम्।

‡ स्वस्तिवाचनं-स्वस्तिवाचनिकमित्यर्थः। स्वस्तिवचनलब्धमिति. यावत्। स्वस्तिवचनं हि शुभकर्म्मारम्भे विघ्नोपशान्तये ब्राह्मणद्वारा कर्त्तुः कर्म्मणां शुभत्ववाचनम्। अत्र देव्याः कामदेवपूजारम्भे स्वस्तिवचनात् मयापि किञ्चित् भोजनं लप्स्यते एवेति विदूषकस्याभिप्रायः।

राजा। वयस्य! एह्यवतरावः।

उभौ। प्रासादावतरणं नाटयतः।

राजा। वयस्य! आदेशय मकरन्दोद्यानस्य मार्गम्।

विदू! एदु भट्टा। इति परिक्रामतः।

विदू। अग्रतोऽवलोक्य। भो एदं तं मअरन्दुज्जाणं; ता एहि पविसम्ह (१)। इति प्रविशतः।

विदू। सविस्मयम्। भो महाराअ! पेक्ख पेक्ख, एदं तं मलअमारुदान्दोलिअमण्डलन्तसहआरमञ्जरीरेणुपडलपडिबद्धपडविआणं, मत्तमहुअरणिअरमुक्कझङ्कारमिलिदमञ्जरकोइलालावसङ्गीदसुहावहं, तुहागमणदंसिआअरं विअ, मअरंदुज्जाणं लक्खीअदि। ता पविसदु भवं (२)।

राजा। समन्तादवलोक्य। अहो रम्यता मकरन्दोद्यानस्य। दृष्ट्वा हि

उद्यद्विद्रुमकान्तिभिः किसलयैस्ताम्रां त्विषं बिभ्रतो
भृङ्गालीविरुतैः कलैरविशदव्याहारलीलायतः।
घूर्णन्तो मलयानिलाहतिचलैः शाखासमूहैर्मुहु-
र्भ्रान्तिं प्राप्य मधुप्रसङ्गमधुना मत्ता दुवामी द्रुमाः ॥ * ॥

(१) भो एतन्मकरन्दोद्यानं तस्मादागच्छ प्रविशामः।

(२) भो महाराज! पश्य, पश्य, एतत् खलु मलयमारुतान्दोलितमण्डलायमानसहकारमञ्जरीरेणुपटलप्रतिबद्धपटवितानम्; मत्तमधुकरनिकरमुक्तझङ्कारमिलितकोकिलालापसङ्गीतसुखावहं, त्वदागमनदर्शितादरमिव, मकरन्दोद्यानं लक्ष्यते। तस्मात्प्रविशतु भवान्।

उद्यदिति। उद्यतां उद्गच्छतां प्रत्यग्राणां विद्रुमाणां प्रवालानां कान्तय इव कान्तयो येषां तैः आताम्रैरित्यर्थः किसलयैः नवपल्लवैः ताम्रां ईषल्लोहितवर्णां त्विषं कान्तिं बिभ्रतो धारयन्तः मधुपानात् मानुषा इव ईषल्लोहित-

अपिच।

मूले गण्डूषसेकासव इव वकुलैर्वाम्यते पुष्पवृष्ट्या,
मध्वाताम्रे तरुण्या मुखशशिनि चिराच्चम्पकान्यद्य भान्ति।
आकर्ण्याशोकपादाहतिषु च रसतां निर्भरं नूपुराणां
झङ्कारस्यानुगीतैरनुकरणमिवारभ्यते भृङ्गसार्थैः॥ *॥

र्णं धारयन्त इत्यर्थः। कलैर्मधुरास्फुटैः भृङ्गाली-विरुतैः भ्रमरश्रेणीनिस्वनैः गुञ्जितैः) अविशदव्याहारस्य अव्यक्तवचनस्य लीलां सादृश्यं विभ्रति धारयन्ति ये ते तथोक्ताः भ्रमरनिस्वनैः मधुपानोन्मत्तमानवा इव प्रलपन्त इत्यर्थः, मलयानिलस्य आहत्या आघातेन चलैश्चञ्चलैः शाखासमूहैः सुरुर्घूर्णन्तः घूर्णायमाना अमी तन्मुखस्थाः द्रुमा इत्या मधोर्वसन्तस्य प्रसङ्गस्य आविर्भावस्य यत् मधु तेन वासन्तपुष्परसेन इत्यर्थः। तत् पीत्वेवेति शेषः। भ्रान्तिं मदेन भ्रमणं प्राप्य मत्ता इव जाता इति शेषः। वसन्तानिलेन चञ्चलास्तरवो मधुपानेनोन्मत्ता इव लक्ष्यन्ते इति भावः।

* वकुलैः वकुलपादपैः पुष्पवृष्ट्या पुष्पवर्षणेन मूले गण्डूषसेकासवो योषितामास्यसिक्तमद्यमिव वाम्यते उद्गीर्यते। अन्यथा कथं तत्प्रसूनानामीदृशो मद्यगन्धसम्पत्तिरिति भावः। कामिनीनां मुखसिक्तमद्येन हि वकुलानि विकसन्तीति कविसमयप्रसिद्धिः। तथाचोक्तं दर्पणे पादाघातादशोकं विकसति वकुलं योषितामास्यमद्यैः इति। वकुलकुसुमानां मदगन्धित्वेनेयमुत्प्रेक्षा। अद्य मधुना मद्येन आताम्रे ईषद्रक्तवर्णे तरुण्या युवत्याः कामिन्या मुखशशिनि मुखचन्द्रे चम्पकानि चम्पककुसुमानि चिरात् भान्ति शोभन्ते किञ्च भृङ्गसार्थैः भ्रमरकुलैः अशोकेषु अशोकतरुषु पादाहतयः चरणाघाताः प्रमादानामितिशेषः तासु निर्भरं गाढं उच्चैरिति यावत् रसतां शब्दायमानानां नूपुराणां आकर्ण्य श्रुत्वा झङ्कारमितिशेषः अनुगीतैरनु गुन् गुन् ध्वनितैः झङ्कारस्य नूपुररणितस्य अनुकरणम् आरभ्यते इव। वाम्यते इत्यत्र वास्यते इति पाठोऽपि दृश्यते, धार्यते सुरभीक्रियते। निर्भरमित्यत्र निश्चलमिति पाठान्तरम् तस्य आकर्ण्येत्यनेनान्वयः।

विदू। आकर्ण्य। भो वअस्स! ण एदे मञ्जुअरा णेउरसद्दं अणुहरन्ति; णेउरसद्दोज्जेव्व एसो देवीए परिअणस्स (१)।

राजा। वयस्य! सम्यगवधारितम्।

ततः प्रविशति वासवदत्ता काञ्चनमाला गृहीतमाल्यविलेपनव्यग्रहस्ता सागरिका विभवतश्च परिवारः।

वास। हञ्जे कञ्चणमाले, आदेसेहि मे मअरंदुज्जाणस्स मग्गं (२)।

काञ्च। एदु एदु भट्टिणी (३)। इति परिक्रामति।

वास। हञ्जे कञ्चणमाले, अध केत्तिअदूरे दाणिं सो रत्तासोअपाअवो, जहिं मए भअवदो मअणस्स पूआ णिव्वत्तइदव्वा (४)।

काञ्च। भट्टिणि, आसण्णं ज्जेव्व किं ण पेक्खदि भट्टिणी? इअं क्खु सा णिरन्तरुब्भिण्णकुसुमसोहिणी भट्टिणीए परिग्गहिदा माहवीलदा; एसा क्खु अवरा णोमालिआलदा, जाए अआलकुसुमससुग्गमसद्दालुणा भट्टिणा अणुदिणं आआसीअदि अप्पा; ता एदं अतिक्कमिअ दीसदीज्जेव्व सो रत्तासोअपाअवो, जहिं देवी पूअं णिव्वत्तइस्सदि (५)।

(१) भो वयस्य! न एते मधुकरा नूपुरशब्दमनुहरन्ति नूपुरशब्द एष एव देव्याः परिजनस्य।

(२) हञ्जे काञ्चनमाले! आदेशय मकरन्दोद्यानस्य मार्गम्।

(३) एतु एतु भट्टी।

(४) हञ्जे कञ्चनमाले! अथ कियद्दूरे स रक्ताशोकपादपः, यत्र मया भगवतः कुसुमायुधस्य पूजा निर्वर्त्तयितव्या।

(५) भर्त्रि! आसन्नमेव किं न प्रेक्षते भर्त्री। इयं खलु सा निरन्तरोद्भिन्नकुसुमशोभिनी भर्त्रा परिगृहीता माधवीलता; एषापि खलु अपरा

वास। ता, एहि, तहिंज्जेव लङ्कं गच्छम्ह (१)।

काञ्च। एदु एदु भट्टिणी (२)। सर्व्वाः परिक्रामन्ति।

वास। अयं सो रत्तासोअपादवो, जहिं अहं पूअं णिव्वत्तइस्सं; तेन हि मे पूआणिमित्ताइं उवअरणाइं उवणेहि (३)।

साग। उपसृत्य। भट्टिणि एदं सव्वं सज्जं (४)।

वास। निरूप्यात्मगतम्। अहो पमादो परिअणस्स, जस्सुज्जेव दंसणपधादो पअत्तेण रक्खीअदि, तस्सुज्जेव दिट्ठिगोअरं पडिदा भवे। भोदु, एदं दाव भणिस्सं। प्रकाशम्। हञ्जे सागरिए; कीस तुमं अज्ज मअणमहूसवपराहीणे परिअणे सारिक्खं वञ्चिअ इहागदा; ता तहिंज्जेव लङ्कं गच्छ, एदं वि सव्वं पूओवअरणं कञ्चणमालाए हत्थे समप्पेहि (५)।

नवमालिकालता यस्या अकालकुसुमोद्गमश्रद्धालुना भर्त्रा अहर्दिवसमाया-स्यते आत्मा, एतदतिक्रम्य दृश्यत एव स रक्ताशोकपादपः, यत्र देवी पूजां निर्व्वर्त्तयिष्यति।

(१) तदेहि, तत्रैव लघु गच्छामः। लघु शीघ्रम्।

(२) एतु एतु भर्त्री।

(३) अयं स रक्ताशोकपादपः, यत्राहं पूजां निर्व्वर्त्तयिष्यामि। तेन हि मे पूजानिमित्तानि उपकरणानि उपनय।

(४) एतत् सर्व्वं सज्जम्।

(५) अहो प्रमादः परिजनस्य, यस्यैव दर्शनपथात् प्रयत्नेन रक्ष्यते तस्यैव दृष्टि-गोचरं पतिता भवेत्, भवतु, एतत् तावत् भणिष्यामि। हञ्जे सागरिके! कथं त्वं मदनमहोत्सवपराधीने परिजने सारिकामुञ्चित्वा अत्रागता? तत्तात् तत्रैव गच्छ, एतच्च सर्व्वं पूजोपकरणं काञ्चनमालाया हस्ते समर्पय। प्रमादः अनवधानता। मदनमहोत्सवपराधीने तत्तत्कार्य्यान्तरव्यासक्ते इत्यर्थः, अथवा मदनमहोत्सवस्य पराधीने परतन्त्रे आमोदनिरते इत्यर्थः।

माग। जं भट्टिणी आणवेदि। इति तथा कृत्वा कतिचित् पदानि गत्वा आत्मगतम्। सारिआ मए उण सुसङ्गदाए हत्थे समप्पिदा; एदम्मि अत्थि मे पेक्खिदुं कोदूहलं, किं जधा तादस्स अन्तेउरे भअवं अणङ्गो अच्चीअदि, दूधवि तहजेव, अध ण वेत्ति। ता अलक्खिआ भविअ पेक्खिस्सं। परिक्रम्यावलोक्य। ता जाव दूरे पूआसमओ होदि; ताव अहम्पि भअवन्तं मअणंज्जेव पूदुं कुसुमाइं अवचिणिस्सं। च इति कुसुमावचयं नाटयति(१)।

वास। कञ्चणमाले, पडिट्ठावेहि असोअमूले भअवन्तं पज्जुण्णं (२)।

काञ्च। जं भट्टिणी आणवेदि। इति तथा करोति।

विदू। परिक्रम्यावलोक्य च। भो वअस्स, जधा वीसन्तो णेउरसद्दो, तथा तक्केमि आअदा देवी असोअमूलंत्ति (३)।

राजा। वयस्य सम्यगवधारितं; पश्य, इयं देवी, या किलैषा

कुसुमसुकुमारमूर्त्तिर्दधती नियमेन तनुतरं मध्यम्।
आभाति मकरकेतोः पार्श्वस्था चापयष्टिरिव॥ * ॥

---

(१) यङ्गलीं आज्ञापयति। सारिका मया पुनः सुसङ्गतायाः हस्ते समर्पिता; इदमस्ति प्रेक्षितुं मे कौतूहलं, किं यथा तातस्यान्तःपुरे भगवानमङ्गोऽर्च्यते, अत्रापि तथैव अथ नवेति। तस्मादभिलक्षिता भूत्वा प्रेक्षिष्ये। तावत् पूजासमयो भवति तावदहमपि भगवन्तं मदनमेव पूजयितुं कुसुमान्यवचेष्यामि।

(२) काञ्चनमाले, प्रतिष्ठापय अशोकमूले भगवन्तं प्रद्युम्नम्।

(३) यङ्गलीं आज्ञापयति।

(४) भो वयस्य, यथा विस्रान्तो नूपुरशब्दस्तथा तर्कयामि आगता देवी अशोकमूलमिति।

---

* या किलैषा देवी कुसुमामिव सुकुमारा मूर्त्तिः शरीरं यस्याः सा तथोक्ता

तदेच्छुपसर्पावः।

राजा। उपसृत्य। प्रिये वासवदत्ते!

वास। विलोक्य। कधं अज्जउत्तो! जअदु जअदु अज्जउत्तो, अलङ्करेदु इमं देसं आसणपरिग्गहेण; एदं आसणं एत्थ उवविसदु अज्जउत्तो (१)।

राजा। नाट्येनोपविशति।

काञ्च। भट्टिणी, सहत्थदिण्णेहिं कुसुमकुङ्कुमचन्दनवासेहिं सोहिदं रत्तासोअपाअवं गदुअ, * अच्चीअदु भअवं पज्जुण्णो (२)।

वास। उवणेहि मे पूजोवअरणाइं (३)।

काञ्च। उपनयति।

वास। तथा करोति।

---

(१) कथमार्यपुत्रः! जयतु जयतु आर्यपुत्रः। अलङ्करोतु इमं देशं आसनपरिग्रहेण; इदमासनं, अत्रोपविशतु आर्यपुत्रः।

(२) भर्त्रि सहस्तदत्तैः कुसुमकुङ्कुमचन्दनवासोभिः शोभितं रक्ताशोकपादपं गत्वा, अर्च्यतां भगवान् प्रद्युम्नः।

(३) उपनय मे पूजोपकरणानि।

(चापयष्टिपक्षे कुसुमान्येव सुकुमारा मूर्त्तिर्यस्येति विग्रहः कामधनुषः कुसुममयत्वादिति भावः) तथापि नियमेन मकरकेतुपूजाव्रतानुरोधेन उपवासादिना इत्यर्थः तनुतरं स्वभावत एव क्षीणं मध्यं क्षीणतरं दधती धारयन्ती (उपमानपक्षे नियमेन नियतम् तनुतरं अतिक्षीणम्)।

* वासेहिं इत्यत्र त्यासेहिं, सोहिदं इत्यत्र सन्निहिदं, गदुअ इत्यत्र कदुअ चेति पाठा दृश्यन्ते, स्यासकैः, सन्निहितं, तत्वा इति च संस्कृतं।

राजा। प्रिये वासवदत्ते!

प्रत्यग्रमज्जनविशेषविविक्तकान्तिः
कौसुम्भरागरुचिरस्फुरदंशुकान्ता।
विभ्राजसे, मकरकेतनमर्च्चयन्ती
बालप्रवालविटपिप्रभवा लतेव ॥ * ॥

अपिच।

सृष्टस्त्वयैष, दयिते, स्मरपूजाव्याप्टतेन हस्तेन।
उद्भिन्नापरमृदुतरकिसलयइव लक्ष्यतेऽशोकः ॥ † ॥

अपिच।

अनङ्गोऽयमनङ्गत्वमद्य निन्दिष्यति ध्रुवं।
यदनेन न सम्प्राप्तः पाणिस्पर्शोत्सवस्तव ॥ ‡ ॥

---

* प्रत्यग्रेण नूतनेन मज्जनविशेषेण नियमार्थस्नानभेदेन विविक्ता विशुद्धा कान्तिः शोभा यस्याः अथवा प्रत्यग्रेण मज्जनेन विशेषेण अतिशयेन विविक्ता कान्तिः शोभा यस्याः सा तथोक्ता, कौसुम्भरागेण रुचिरः सुन्दरः स्फुरन् दीप्यमानः अंशुकान्तो यस्याः सा त्वं मकरकेतनं कन्दर्पं अर्च्चयन्ती पूजयन्ती सती, बाला नूतनोद्गताः प्रवाला नवपल्लवा यस्य स चासौ विटपी चेति तस्मात् प्रभवो यस्याः सा तथोक्ता लतेव विभ्राजसे विशेषेण शोभसे।

† हे दयिते प्रिये त्वया स्मरपूजायां व्याप्टतेन नियुक्तेन हस्तेन सृष्टः एषः अशोकः उद्भिन्नं अपरं अन्यत् मृदुतरं अशोकपल्लवादपि कोमलतरं किसलयं पल्लवं यस्य स तथोक्त इव लक्ष्यते, एतेन देवीहस्तस्य सौकुमार्यातिशयः सूच्यते।

‡ अयं अनङ्गः कामः अद्य स्वकीयं अनङ्गत्वं अङ्गहीनत्वं ध्रुवं निश्चितं निन्दिष्यति, यत् यस्मात् अनेन कामेन तव पाणिस्पर्शो हस्तस्पर्श एव उत्सवः न प्राप्तः अधिगतः, अर्थात् अनङ्गत्वात् हेतोः।

काञ्च। भट्टिणि अच्चिदो भअवं पज्जुण्णो; ता करेहि भत्तुणो पूआसक्कारं (१)।

वास। तेण हि उवणेहि मे कुसुमाइं विलेवणञ्च (२)।

काञ्च। भट्टिणि, एदं सव्वं सज्जं (३)

वास। नाट्येन राजानं पूजयति।

सागरि। गृहीतकुसुमा। हद्धी, हद्धी, कहं कुसुमलोहोक्खित्त-हिअआए अदिचिरं ज्जेव मए कदं; ता इमिणा सिन्दुवार-विडवेण ओवारिअसरीरा भविअ पेक्खामि। विलोक्य। कहं, पेक्खिदो ज्जेव अपुव्वो कुसुमाउहो, अम्हाणं तादस्स अन्तेउरे चित्तगदो अच्चीअदि, इह तु पच्चक्खो लक्खीअदि! ता अहंपि इमेहिं कुसुमेहिं इह ट्ठिदा ज्जेव भअवन्तं कुसुमाउहं पूअइस्सं। इति कुसुमानि प्रक्षिपति। नमो दे भअवं कुसुमाउह, सुभदंसणो मे भविस्ससि, दिट्ठं जं दट्ठव्वं; अमोघदंसणो मे भविस्ससि। इति प्रणमति। अच्चरीअं! दिट्ठोवि, पुणो पेक्खिदव्वो, ता जाव ण कोवि मं पेक्खदि दाव ज्जेव गमिस्सं (४)। इति निष्क्रामति।

---

(१) भर्त्रि, अर्चितो भगवान् प्रद्युम्नः, तस्मात् कुरु भर्तुः पूजासत्कारम्।

(२) तेन हि उपनय मे कुसुमानि विलेपनञ्च।

(३) इदं सर्वं सज्जम्।

(४) हा धिक्, हा धिक्, कथं कुसुमलोभोल्लिप्तहृदयया अतिचिरमेव मया कृतं, तस्मादमुनैव सिन्धुवारविटपेनावारितशरीरा भूत्वा प्रेक्षिष्ये। अथ, प्रेक्षितएव अपूर्वः कुसुमायुधः, अस्माकं तातस्यान्तःपुरे चित्रगतोऽर्च्यते, इह तु प्रत्यक्षो लक्ष्यते! तस्मादहमपि एतैः कुसुमैरिह स्थितैव भगवन्तं कुसुमायुधं पूजयिष्यामि। नमस्ते भगवन् कुसुमायुध! शुभदर्शनो मे भविष्यसि। दृष्टं यद्द्रष्टव्यं, अमोघदर्शनो मे भविष्यसि, आश्चर्यं! दृष्टोऽपि पुनः प्रेक्षितव्यः। तद्यावत् न कोऽपि प्रेक्षते तावदेव गमिष्यामि

वास। अज्ज वसन्तअ, एहि, सम्पदं तुमंपि[1] सोत्थिवाअणं पडिच्छहि (१)

विदू। उपसर्पति।

वास। विलेपनकुसुमाभरणदानपूर्वकम्। अज्ज! एदं सोत्थिवाअणं पडीच्छ। इत्यर्पयति (२)

विदू। सहर्षं गृहीत्वा। सोत्थि भोदीए (३)

नेपथ्ये वैतालिकः पठति।

अस्तापास्तसमस्तभासि नभसः पारं प्रयाते रवौ
आस्थानीं समये समं नृपजनः सायन्तने सम्प्रतम्,
संप्रत्येष सरोरुहद्युतिमुषः पादांस्तवासेवितुं
प्रीत्युत्कर्षकृतो दृशामुदयनस्येन्दोरिवोद्वीक्षते ॥ * ॥

---

(१) आर्य वसन्तक, एहि, सम्प्रतं त्वमपि स्वस्तिवाचनिकं प्रतीच्छ।

(२) आर्य, इदं स्वस्तिवाचनिकं प्रतीच्छ।

(३) स्वस्ति भवत्यै।

---

* अस्ते अस्ताचले अपास्ता निक्षिप्ताः समस्ता भासः किरणा येन स तस्मिन् रवौ सूर्ये नभसः आकाशस्य पारं प्रयाते गते सति, सायन्तने सन्ध्याकालिके, समये आस्थीयते अस्यां इति आस्थानीं राजसभां समं युगपत् सम्प्रतम् समागच्छन् एष नृपजनः सामन्तराजचक्रं सम्प्रति इदानीं सरोरुहाणां पद्मानां द्युतिं कान्तिं मुषणन्ति अपहरन्ति ये ते तान् एकत्र शोभया तिरस्कृतकमलकान्तीः, अपरत्र कमलिनीद्युतिविलोपिनः प्रशाङ्कोदयात् पद्मानां निमीलनादिति भावः प्रीतेरानन्दस्य उत्कर्षः अतिशयः तं करोति जनयति यः स तस्य दृशां चक्षुषां निरतिशयानन्दहेतोरिन्दोश्चन्द्रस्येव तस्य जनस्य वत्सराजस्य पादान् चरणान् किरणान् च आसेवितुं उद्वीक्षते

सागः। श्रुत्वा, सहर्षं परिक्रम्य, राजानं दृष्ट्वा सस्पृहम्। कहं, अअं सो राआ उअअणो णाम, जस्स अहं तादेण दिण्णा; ता परप्पेसणदूसिदं वि मे सरीरं एदस्स दंसणेण दाणिं बहुमदं संवुत्तं (१)

राजा। कथमुत्सवापहृतचेतोभिः सन्धातिक्रमोऽप्यस्माभिर्नोपलक्षितः। देवि पश्य

उदयगिरितटान्तरितमियं प्राची सूचयति दिङ्मुखानाथम्।
परिपाण्डुना मुखेन प्रियमिव हृदयस्थितं रमणी ॥ * ॥

देवि, तदुत्तिष्ठावः आवासाभ्यन्तरमेव प्रविशावः।

सर्वे। उत्थाय परिक्रामन्ति।

सागः। कधं पत्थिदा देवी; भोदु, तुरिअं गमिस्सं। राजानं सस्पृहं दृष्ट्वा निश्वस्य च। कधं मन्दभाइणीए मए पेक्खिदुं वि चिरं ण पारिदो अअं जणो (२)। इति निष्क्रान्ता।

---

(१) कथमयं स राजा उदयनो नाम, यस्माहं तातेन दत्ता, तस्मात् परप्रेषणदूषितमपि मे शरीरं एतस्य दर्शनेनाद्य बहुमतं संवृत्तम्।

(२) कथं प्रस्थिता देवी; भवतु, तदहमपि त्वरिता गमिष्यामि। हा धिक्, हा धिक्, मया मन्दभागिन्या चिरं प्रेक्षितुमपि न पारितः अयं जनः।

सतृष्णमुन्नमिताननः पश्यतीत्यर्थः। पादांस्तवासेवितुम् इत्यत्र पादान् समासेवितुमिति क्वचित् पाठः।

* इयं पुरोवर्त्तिनी प्राची पूर्व्वा दिक् उदयस्य उदयाचलस्य तटेन अन्तरितं आच्छन्नं इदानीमप्युदितमित्यर्थः निशानाथं चन्द्रं रमणी विरहविधुरा कामिनी परिपाण्डुना मुखेन हृदयस्थितं प्राणनाथमिव सूचयति अनुमापयति। पूर्व्वदिग्विकासेन चन्द्रमा उदयोन्मुख इत्यनुभीयते इत्यर्थः।

राजा। परिक्रामन्।

देवि! त्वन्मुखपङ्कजेन शशिनः शोभातिरस्कारिणा
पश्याब्जानि विनिर्जितानि सहसा गच्छन्ति विच्छायताम्।
श्रुत्वा ते परिवारवारवनितागीतानि भृङ्गाङ्गनाः
लीयन्ते मुकुलान्तरेषु शनकैः सञ्जातलज्जा इव॥ * ॥

इति निष्क्रान्ताः सर्वे।

मदनमहोत्सवो नाम

प्रथमोऽङ्कः समाप्तः।

---

* हे देवि पश्य शशिनः शशाङ्कस्य शोभां तिरस्करोति यत् तत् तेन चन्द्रकान्तिमधरीकुर्वता तव मुखपङ्कजेन मुखकमलेन विनिर्जितानि अब्जानि पद्मानि (अम्बु जायन्ते यानि तानि अब्जानि) सहसा अतर्कितमेव विच्छायतां शोभाहीनतां यान्ति प्राप्नुवन्ति, भृङ्गाङ्गना मधुकर्यः, ते परिवारवारवनितानां परिवारवारविलासिनीनां गीतानि श्रुत्वा सञ्जाता लज्जा यासां ता तथोक्ता इव ताभ्यः पराजयादिवेति भावः मुकुलान्तरेषु कुड्मलमध्येषु शनकैर्मन्दं लीयन्ते लक्षायिता भवन्तीत्यर्थः।

द्वितीयोऽङ्कः ।

—oo—

ततः प्रविशति सारिकापञ्जरव्यग्रहस्ता सुसङ्गता।

सुसं। हद्धी ! हद्धी ! अध दाणिं मम हत्थे इमं सारिअं णिक्खिविअ कहिं गदा मे पिअसही सागरिआ भविस्सदि। अन्यतो दृष्ट्वा। एसा क्खु णिउणिआ इध ज्जेव आअच्छदि ता जाव एदं पुच्छिस्सं (१)।

ततः प्रविशति निपुणिका।

निपु। उअलद्धो क्खु मए भट्टिणो वुत्तन्तो, ता जाव गदुअ भट्टिणीए णिवेदेमि (२)। इति परिक्रामति।

सुसं। हला णिउणिए, कहिं दाणिं तुमं विम्हओक्खित्त-हिअआ विअ, इह ट्ठिदं मं अवहीरिअ कुदो अदिक्कमसि(३)।

निपु। कधं सुसङ्गदा ? हला सुसङ्गदे! सुट्ठु तुए जाणिदं। एदं क्खु मम विम्हअस्स कारणं, अज्ज किल भट्टा सिरिअपव्व-दादो आअदस्स, सिरिखण्डदासणामहेअस्स धम्मिअस्स सभा-

(१) हा धिक्, हा धिक्, अथेदानीं मम हस्ते इमां सारिकां निक्षिप्य कुत्र गता मे प्रियसखी सागरिका भविष्यति। एषा खलु निपुणिका इत एवागच्छति, तदाघदेनां प्रक्ष्यामि।

(२) उपलब्धो मया भर्तुर्वृत्तान्तः, तदावङ्गत्वा भर्त्रे निवेदयामि।

(३) हला निपुणिके, त्वं कुतेदानीं विस्मयोत्क्षिप्तहृदयेव, इह स्थितं मामवधीर्य कुतोऽतिक्रामसि।

अहो अकालकुसुमसंजणणदोहदं सिक्खिअ, अत्तणो पडिग्गहिदं णोमालिअं कुसुमसमिद्धिसोहिअं करिस्सदित्ति, तहिं एदं वृत्तन्तं देवीए जाणिदुं पेसिदम्हि, तुमं उण कहिं पत्थिदा ? (१)।

सुअं। पिअसहीं सागरिअं अण्वेसिदुं (२)।

हिए। हला! दिट्ठा मए सागरिआ गहीदसमुग्गअचित्तफलअवट्टिआ समुव्विग्गा कअलीघरं पविसन्ती, ता गच्छ पिअसहीं, अहं वि देवीसआसं गमिस्सं(३)। इति निष्क्रान्ते। प्रवेशकः*।

ततः प्रविशति गृहीतचित्रफलकवर्त्तिका मदनावस्थां नाटयन्ती सागरिका।

साग। हिअअ! पसीद, पसीद, किं इमिणा आआसमेत्तफलेण दुल्लहजणप्पत्थणाणुबन्धेण। अणङ्ग। जेण एव्व दिट्ठेण दे ईदिसो सन्तावो णं वट्टदि, पुणो वि, तं ज्जेव

(१) कथं प्रियसखी सुसङ्गता? सखि सुसङ्गते! सुष्ठु त्वया ज्ञातं, इदं खलु मम विस्मयस्य कारणम्। अद्य किल भर्त्ता श्रीपर्व्वतादागतस्य श्रीखण्डदासनामधेयस्य धार्म्मिकस्य सकाशात् अकालकुसुमसंजननदोहदं चित्रित्वा आत्मनः परिगृहीतां नवमालिकां कुसुमसमृद्धिशोभितां करिष्यतीति। तत्र एवं वृत्तान्तं ज्ञातुं देव्या प्रेषितास्मि, त्वं पुनः क्व प्रस्थिता?

(२) प्रियसखीं सागरिकामन्वेष्टुम्।

(३) हला मया तव प्रियसखी सागरिका गृहीतसमुद्गकचित्रफलकवर्त्तिका समुद्विग्ना कदलीगृहं प्रविशन्ती, तद्गच्छ प्रियसखीम्, अहमपि देवीसकाशं गमिष्यामि।

* प्रवेशकलक्षणसूत्रं दर्पणे

प्रवेशकोऽनुदात्तोक्त्या नीचपात्रप्रयोजितः।
अङ्कद्वयान्तर्विज्ञेयः शेषं विष्कम्भके यथा॥

पेक्खिदुं अहिलंससिच्चि अहो दे मूढदा। अद्द णिस्संसहिअअ! जम्मदो पहुदि सह संवड्ढिअं इमं जणं परिच्चइअ, क्खणमेत्तदंसणपरिचिदं जणं अणुगच्छन्तो, ण लज्जेसि? अहवा को तुह दोसो, अणंगसरपडणभीदेण तुए एवं अज्ज ववसिदं। भोदु दाव, अणंगं उवालहिस्सं। सामर्षम्। भअवं कुसुमाउह! णिज्जिदसअलसुरासुरो भविअ, इत्थिआजणं पहरन्तो, कधं ण लज्जेसि?। विचिन्त्य। अहवा अणंगोऽसि, सव्वधा मम मन्दभाइणीए इमिणा दुण्णिमित्तेण मरणंज्जेव उवट्ठिदं। फलकमवलोक्य। ता जाव दुह ण कोपि आअच्छदि, दाव आलेक्खसमप्पिदं तं अभिमदं जणं पेक्खिअ, जहा समीहिदं तहा करिस्सं(१)। सावष्टम्भमेकमना भूत्वा नाट्येन फलकं गृहीत्वा निश्वस्य। जदवि मे अहिसङ्गेण वेवदि अंगं अतिमेत्तं अग्गहन्तो, तहवि तस्स जणस्स अग्गो दंसणोवाओ णत्थित्ति,

---

(१) हृदय! प्रसीद, प्रसीद; किमनेन आयासमात्रफलकेन दुर्लभजनप्रार्थनानुबन्धेन। अन्यच्च। येनैव दृष्टेन एतादृशः सन्तापो ननु वर्द्धते, पुनरपि तं जनं प्रेक्षितुमभिलषसीति अहो ते मूढता। अयि दृढसंसहृदय! जन्मतः प्रभृति सह संवर्द्धितं इमं जनं परित्यज्य, क्षणमात्रदर्शनपरिचितं जनमनुगच्छन् कथं न लज्जसे? अथवा कस्तव दोषः, अनङ्गशरपतनभीतेन त्वया एवमद्य व्यवसितम्। भवतु तावत्, अनङ्गमुपालप्स्ये। भगवन् कुसुमायुध! निर्जितसकलसुरासुरो भूत्वा, कथं स्त्रीजनं प्रहरन् न लज्जसे? अथवा, अनङ्गोऽसि। सर्व्वथा मम मन्दभाग्याया अनेन दुर्निमित्तेन मरणमेव उपस्थितम्। तद्यावदिह कोऽपि नागच्छति, तावदेव आलेख्यसमर्पितं तं अभिमतं जनं प्रेक्ष्य, यथा समीहितं तथा करिष्यामि। आयासेत्यत्र आर्षेति, सामर्षम् इत्यत्र सास्रम्, इति चं पाठो द्रष्टव्यः।

ता जहा तहा आलिहिअ णं पेक्खिस्सं (१)। इति नाट्येन लिखति।

ततः प्रविशति सुसङ्गता।

सुसं। पविसामि दाणिं कुसुमावलीहरं, ता जाव पविसामि। प्रविश्यावलोक्य च सविस्मयम्। किं उण एसा गुरुआणुराओक्खित्तहिअआ विअ किम्पि आलिहन्ती ण मं पेक्खदि, भोदु, ता जाव से दिट्ठिवहं परिहरिअ णिरूवइस्सं। सैरं पृष्ठतोऽवस्थाः स्थित्वा दृष्ट्वा सहर्षम्। कहं भट्टा आलिहिदो। साहु साअरिए साहु, अहवा ण कमलाअरं वज्जिअ, राअहंसी अण्णम्मिं अहिरमदि (२)।

साग। सबाष्पम्। आलिहिदो मए एसो, किं उण अणवरदणिवडन्तबाहसलिलेण मे दिट्ठी पेक्खिदुं ण पहवदि। ऊर्ध्वमभ्रूणि संहरन्ती, सुसङ्गतां दृष्ट्वा, उत्तरीयेण फलकं प्रच्छादयन्ती विलोक्य स्मितं कृत्वा। कहं पिअसही सुसङ्गदा, सहि सुसङ्गदे! इदो उवविस (३)।

---

(१) यद्यपि मे अतिसाध्वसेन वेपते अयमतिमात्रमयहस्तः, तथापि तस्य जनस्यान्यो दर्शनोपायो नास्ति इति, तस्माद्यथा तथा भवतु आलिख्य एनं प्रेक्षिष्ये।

(२) इदं तावत् कदलीगृहं प्रविशामि। किं पुनरेषा गुर्वनुरागोत्क्षिप्तहृदया न किमप्यालिखन्ती मां पश्यति भवतु; तस्माद्यावदस्या दृष्टिपथं वर्जयित्वा निरूपयिष्यामि किमेषा आलिखतीति। कथं भर्त्ता आलिखितः, साधु प्रियसखि! साधु, अथवा कमलाकरमुज्झित्वा राजहंसी नान्यस्मिन्नभिरमते।

(३) आलिखितो मया एषः किं पुनरनवरतनिपतद्बाष्पसलिलेन मे दृष्टिः प्रेक्षितुं न प्रभवति। कथं प्रियसखी सुसङ्गता; प्रियसखि सुसङ्गते! इतोपविश।

सुसं। उपविश्य फलकं गृहीत्वा दृष्ट्वा च। सहि! को एसो तुए आलिहिदो (१)।

साग। सलज्जम्। पउत्तमअणमहोसवे भअवं अणङ्गो (२)।

सुसं। सस्मितम्। अहो दे णिउणत्तणं। किं उण सुण्णं विअ चित्तं पडिभादि; ता अहंपि आलिहिअ रदिसणाथं करिस्सं (३)। वर्त्तिकां गृहीत्वा नाट्येन रतिव्यपदेशेन सागरिकां लिखति।

साग। विलोक्य सक्रोधम्। सहि सुसङ्गदे! कीस तुए अहं एत्थ आलिहिदा? (४)।

सुसं। विहस्य। सहि! किं अआरणे कुप्पसि? जादिसो तुए कामदेवो आलिहितो, तादिसी मए रदी आलिहिदेत्ति। ता असब्भासंभाविणि, किं तुए एदिणा आलविदेण, कहेहि सव्वं वुत्तन्तं (५)।

साग। स्वगतम्। णं जाणिदम्हि पिअसहीए। प्रकाशम्। पिअसहि! महदी खु मे लज्जा; ता तहा करेसु जहा ण कोवि अवरो एदं वुत्तन्तं जाणादित्ति (६)।

---

(१) सखि! क एष त्वया आलिखितः।

(२) प्रवृत्तमदनमहोत्सवे भगवाननङ्गः।

(३) अहो ते निपुणत्वम्। किं पुनः शून्यमिव चित्तं प्रतिभाति, तस्मादहमपि आलिख्य रतिसनाथं करिष्यामि।

(४) सखि! कथं त्वयाहमत्रालिखिता?

(५) सखि! किमकारणं कुप्यसि? यादृशस्त्वया कामदेव आलिखितः, मयापि तादृशी रतिरालिखिता, तस्मात् अन्यथासम्भाविनि! किं तवैतेनालापेन। कथय सर्वं वृत्तान्तम्।

(६) ननु ज्ञातास्मि प्रियसख्या। प्रियसखि! महती खलु मे लज्जा; तस्मात् तथा कुरुष्व यथा न कोऽपि इमं वृत्तान्तं जानातीति।

सागं। सहि! मा लज्ज; ईदिसस्स कण्णारत्तणस्स अवस्सं एव्व ईदिसे वरे अहिलासेण होदव्वं, तहवि जहा ण कोवि अवरो एदं वुत्तन्तं जाणिस्सदि तह करेमि। एदाए उण मेधाविणीए सारिआए एत्थ कारणेण होदव्वं, कदावि एसा अम्हाणं आलावेसु गहिदक्खरा कस्सवि पुरदो मन्तइस्सदित्ति (१)।

सागं। सहि! अदोवि मे अधिअदरं सन्तावो वट्टदि (२)।

इति भिन्नावस्थां नाटयति।

सुसं। सागरिकाया हृदये हस्तं दत्वा। सहि! समस्सस समस्सस जाव इमाए दिग्घिआए णलिणीपत्ताणि मुणालिआं अ गेण्हिअ, लहुं आअच्छामि (३)। इत्युत्थाय परिक्रम्योपसृत्य च नलिनीपत्राणि गृहीत्वा, हृदये ददाति, नलिनीपत्रैः शयनं मृणालैर्वलयानि रचयित्वा, परिशिष्टानि नलिनीपत्राणि सागरिकाया हृदये निक्षिपति।

सागं। सहि! अवणेहि इमाइं णलिणीपत्ताइं मुणालवलआइं अ; अलं एदिणा, कीस अआरणे अत्ताणं आआसेसि णं भणामि (४)।

---

(१) सखि! मा लज्जस्व; ईदृशस्य कन्यारत्नस्य अवश्यमेव ईदृशे वरे अभिलाषेण भवितव्यम्; तथापि यथा न कोऽपि अपर इमं वृत्तान्तं ज्ञास्यति तथा करोमि। एतया पुनः मेधाविन्या सारिकया अत्र कारणेन भवितव्यम्, एषा अस्मदालापस्य गृहीताक्षरा कस्यापि पुरतो मन्त्रयिष्यतीति। अत्र कारणेन भवितव्यं एषा अस्माकं रहस्यप्रकाशे कारणं भविष्यतीत्यर्थः। गहिदक्खरा इत्यत्र गहिदत्था इति वा पाठः।

(२) अतोऽपि मे अधिकतरं सन्तापो वर्त्तते। अदोपि इत्यत्र अज्ज इति क्वचित् पाठः अद्य इति सं०।

(३) सखि! समाश्वसिहि, समाश्वसिहि; यावदस्या दीर्घिकाया नलिनीपत्राणि मृणालिकाश्च गृहीत्वा लघु आगच्छामि।

(४) सखि! अपनय इमानि नलिनीपत्राणि मृणालवलयानि च, अलमेतेन; अयमकारणेनात्मानमायासयसि ननु भणामि।

दुल्लहजणअणुराओ; लज्जा गरुई परव्वसो अप्पा।
पिअसहि! विसमं पेम्मं, मरणं सरणं च वरिअमेक्कं (१)॥*॥

इति मूर्च्छति।

नेपथ्ये कलकलः।

कण्ठे क्तावशेषं कनकमयमधः पृङ्खलालम्बं कर्षन्
क्रान्त्वा द्वाराणि हेलाचलचरणरणत्किङ्किणीचक्रवालः।
दत्तातङ्को गणानामनुहतसरणिः सम्भ्रमादश्वपालैः
प्रभ्रष्टोऽयं स्रवङ्गः, प्रविशति दृषतेर्मन्दिरं मन्दुरायाः॥†॥

---

(१) दुर्लभजनानुरागो लज्जा गुर्वी परवश आत्मा।
प्रियसखि! विषमं प्रेम मरणं शरणं केवलमेकम्॥

---

* प्रियसखि! दुर्लभे दुःखेन लब्धुं शक्ये जने ममानुरागः मे हृदयचौरो जनः सुदूरं दुष्प्राप इत्यर्थः, नन्वास्तां तावत् नितरां दुर्लभः स ते चित्तवल्लभः स्वयं गत्वा आत्मा समर्पयतां स च त्वत्सौन्दर्यसुग्धः करुणदृष्ट्यापि त्वां परिग्रहीष्यत्येवेत्याह सखि! सत्यं न पुनरात्मानं स्वयं दातुं शक्नोमि गुर्वी श्वालीनता मां बाधते, लज्जापरित्यागेनापि मे मनोरथप्राप्तिः सुदूरमपास्तैव सखि आत्मा मे परवशः स्वयमात्मसमर्पणेऽपि मे प्रभुता नास्तीत्यर्थः तर्हि प्रेमैव हृदयादपनीयतां किमनेन आशामात्रकरणेनेत्याह प्रियसखि प्रेम विषमं अतिदुरन्तं त्यक्तुमीहमानमपि मां न कथमपि त्यजतीत्यर्थः अतः किं करोमि नान्यदुपायं पश्यामि मरणमेव मे शरणम् जीवितपरित्यागेनैव मम दुःखावसानं भविष्यतीत्यर्थः। अत्र नवरिअमेक्कम् इत्यत्र न वारक्कम् इति पाठोऽपि दृश्यते। न पारक्यम् इति सं। पारक्यम् पराधीनत्वम्।

† क्तात् छिन्नात् अवशेषमवशिष्टम्। हेलया लीलया चलयोः चपलयोः चरणयोः चलत्किङ्किणीचक्रवालः क्षुद्रघण्टिकामालायस्य सः गणानां साधारणलोकसमूहानां दत्तः आतङ्कः भयं येन सः अश्वपालैः अश्वरक्षकैः सम्भ्रमादावेगात् भीतिचञ्चलत्वेत्यर्थः अनुहता सरणिः पङ्क्तिर्यस्य सः प्रभ्रष्टः विगलितः [illegible]

अपिच।

नष्टं वर्षवरैर्मनुष्यगणनाभावाद्रपास्य त्रपाम्
अन्तः कञ्चुकिकञ्चुकस्य विशति त्रासाद्यं वामनः।
पर्य्यन्ताश्रयिभिर्निजस्य सदृशं नाम्नः किरातैः कृतं
कुब्जा नीचतयैव यान्ति शनकैराम्लेक्षणाशङ्किनः॥*॥

सुसं। आकर्णय सखि चम्पकम्। सहि! उट्ठेहि, उट्ठेहि; एसो क्खु दुट्ठवाणरो इदोज्जेव्व आअच्छदि (१)।

सारं। किं दाणिं करेम्ह (२)।

सुसं। एहि इमस्सिं तमालविड़वान्धआरे पविसिअ एदं अदिवाहेम्ह (३)। परिक्रम्य उभे एकान्ते पर्य्युपस्थिते।

सारं। सुसङ्गदे! कहं तुए चित्तफलओ उज्झिदो, कदावि कोवि तं पेक्खदि (४)।

---

(१) सखि! उत्तिष्ठ, उत्तिष्ठ; एष खलु दुष्टवानर इत एवागच्छति।

(२) सखि! अत्र किमिदानीं कुर्म्मः।

(३) अस्मिन् तमालविटपान्धकारे प्रविश्यैनमतिवाहयामः। अतिवाहयामः अतिक्रामयामः।

(४) सखि! कथं त्वया चित्रफलक उज्झितः, कदापि कोऽपि तं प्रेक्ष्यति।

बन्धवः पलायिताः, प्लवङ्गः वानरः प्लवेन लम्फेन गच्छति यः सः प्लवशब्दात् गमधातोः घञ्प्रत्ययेन निपातनात् सिद्धः। मन्दुरायाः घोटकशालायाः। वाजिशाला तु मन्दुरेत्यमरः। दत्तालङ्को गणानामित्यत्र दत्तातङ्कोऽङ्गनानामित्यपि पाठः।

* वर्षवरैः क्लीवैः मनुष्येषु मध्ये तेषां गणनाया अभावात् त्रपां लज्जां अपास्य त्यक्त्वा नष्टं पलायितम्। किरातैः व्याधैः पर्य्यन्तं नगरप्रान्तभूमिं आश्रयन्ति ये ते तथोक्तैः सद्भिः निजस्य नाम्नः किरात इत्यभिधानस्य सदृशं कृतम्। किरं पर्य्यन्तभूमिं अतन्ति गच्छन्ति ये ते किराताः। कुब्जाः आत्मनामीक्षणं दर्शनं आशङ्कमानाः चटुलः कपिस्तान् पश्येदिति भयव्याकुलाः शनकैः शनैः नीचतयैव प्रकृत्या नीचा अपि चेष्टया नीचतराः सन्तो यान्ति गच्छन्ति।

सुसं। अइ सुत्थिदे! किं अज्जवि चित्तफलएण करिस्ससि, एसोवि दधिभत्तलंपटो एदं पञ्जरं उग्घाडिअ दुट्ठवाणरो अदिक्कन्तो, एसा क्खु मेहाविणी उड्डीणा अण्णदो गच्छदि; ता एहि लहुं अणुसरेम्ह; इमस्स आलावस्स गहिदक्खरा कस्सवि पुरदो मन्तइस्सदि (१)।

सारि। सहि! एवं करेम्ह (२)। इति परिक्रामतः।

नेपथ्ये। हीही भोः अच्चरिअं अच्चरिअं (३)।

सारि। विलोक्य। सुसङ्गदे! जाणीअदि कहं पुणो दुट्ठवाणरो ज्जेव आअच्छदि (४)।

सुसं। दृष्ट्वा विहस्य। अइ काअरे! ण भेहि; भट्टिणो परिवासवत्ती क्खु एसो अज्जवसंतओ (५)।

ततः प्रविशति वसन्तकः।

वस। हीही भोः! अच्चरिअं अच्चरिअं; साहु रे सिरिखण्डदास धम्मिअ, साहु (६)।

सारि। सस्पृहमवलोकयति।

---

(१) अयि सुस्थिते! किमद्यापि चित्रफलकेन करिष्यसि; एष दधिभक्तलम्पट इदं पञ्जरमुद्घाट्य दुष्टवानरोऽतिक्रान्तः एषा खलु मेधाविनी उड्डीना अन्यतो गच्छति; तस्मादागच्छ लघु अनुसरामः; अस्यालापस्य गृहीताक्षरा कस्यापि पुरतो मन्त्रयिष्यति। दधिभक्तलम्पटः दधिभक्तप्रियः।

(२) सखि! एवं कुर्मः।

(३) हीही भोः आश्चर्यं आश्चर्यम्।

(४) सुसङ्गते! ज्ञायते कथं पुनरपि एष दुष्टवानर एवागच्छति।

(५) अयि कातरे! न बिभीहि; भर्तुः परिपार्श्ववर्ती खलु एष आर्यवसन्तकः।

(६) हीही भोः आश्चर्यं आश्चर्यम्, साधु रे श्रीखण्डदास धार्मिक साधु

सखं। सहि! किं एदिणा दिट्ठेण दूरीभूता क्खु सारिआ; ता एहि, अणुसरेम्ह (१)। इति निष्क्रान्ते।

वस। साहु रे सिरिखण्डदास धम्मिअ! साहु; जेण दिण्णमेत्तेण एव्व तेण दोहएण ईदिसी णोमालिआ सम्पुत्ता, जेण निरन्तरुब्भिन्नकुसुमगुच्छशोभिअविड़वा उवहसन्ती विअ लक्खीअदि देविपरिगहिदं माहवीलदं ता जाव गदुअ पिअवअस्सस्स णिवेदेमि। परिक्रम्यावलोक्य च। एसो क्खु पिअवअस्सो तस्स दोहदस्स लद्धपच्चअदाए परोक्खं पि तं णोमालिअं पच्चक्खं विअ कुसुमिदं पेक्खन्तो, हरिसुफुल्ललोअणो इदो एव्व आअच्छदि। ता जाव णं उपसप्पामि (२)। इति राजानं प्रति निर्गतः।

ततः प्रविशति यथानिर्दिष्टो राजा।

राजा। सहर्षम्।

उद्दामोत्कलिकां विपाण्डुरुरुचं प्रारब्धजृम्भां क्षणात्
आयासं श्वसनोद्गमैरविरलैरातन्वतीमात्मनः।

---

(१) सखि किमेतेन दृष्टेन, दूरीभूता खलु सारिका, तस्मादागच्छ अनुसरावः।

(२) साधु रे श्रीखण्डदास धार्मिक! साधु, येन दत्तमात्रेणैव तेन दोहदेन दृष्टशी नवमालिका संवृत्ता येन निरन्तरोद्भिन्नकुसुमगुच्छशोभितविटपा उपहसन्तीव लक्ष्यते देवीपरिगृहीतां माधवीलतां, तद्यावत् गत्वा प्रियवयस्यस्य निवेदयामि। एष खलु प्रियवयस्यस्तस्य दोहदस्य लब्धप्रत्ययतया परोक्षामपि तां नवमालिकां प्रत्यक्षामिव कुसुमितां पश्यन्, हर्षप्रफुल्ललोचन इतः, एवागच्छति। तद्यावदुपसर्पाम्येनम्। शोभिअ इत्यत्र, क्वचित् क्वादिअ इति पाठः।

भो अद्योद्यानलतामिमां समदनां नारीमिवान्यां ध्रुवं
पश्यन् कोपविपाटलद्युति मुखं देव्याः करिष्याम्यहम् ॥ * ॥
तद्दत्तान्तमुपालब्धुं गतोऽसौ वसन्तको नाद्याप्यायाति।

विदूषकः। सहसोपसृत्य। जअदु जअदु पिअवअस्सो; भो वअस्स! दिट्ठिआ वड्ढसि जेण दिसमेत्तेण(१)। इति पुनः पठति।

राजा। वयस्य! कः सन्देहः; अचिन्त्यो हि मणिमन्त्रौषधीनां प्रभावः। पश्य

कण्ठे श्रीपुरुषोत्तमस्य समरे दृष्ट्वा मणिं शत्रुभिः
नष्टं मन्त्रबलाद्वसन्ति वसुधामूले भुजङ्गा हताः।
पूर्वं लक्ष्मणवीरवानरभटा ये मेघनादाहताः
सोत्वा ते च महौषधेर्गुणनिधेर्गन्धं पुनर्जीविताः ॥ † ॥

---

(१) जयतु जयतु प्रियवयस्यः, भो वयस्य! दिष्ट्या वर्द्धसे येन दृष्टमात्रेणेत्यादि। इ-ई

---

* उद्दाम निर्बाधं अतिशयितमिति यावत् आमूलात् शिरःपर्य्यन्तमित्यर्थः, उद्गताः कलिका मुकुलानि यस्याः सा तथोक्ताम्, नारीपक्षे उद्दामा आत्यन्तिकी उत्कलिका उत्कण्ठा यस्याः सा ताम्। विपाण्डुरा रुक् कान्तिर्यस्याः सा ताम् उभयत्रापि समानम्। प्रारब्धा जम्भा विकाशो यस्याः सा ताम्, अन्यत्र प्रारब्धा जृम्भा जृम्भणं यस्याः सा ताम्। अविरलैः अविच्छिन्नैः श्वसनोद्गमैः मारुतसञ्चालनैः आत्मनः आयासं क्लेशं आतन्वतीं विदधतीम् उपमानपक्षे आत्मनः अविरलैः घनैः श्वसनोद्गमैः निश्वासोदयैः। इमां उद्यानलतां नवमालिकां समदनां स्मरपीड़िताम् अन्यां अपरां नारीमिव पश्यन् देव्याः प्रद्योतराजदुहितुर्वासवदत्तायाः मुखं कोपेन विपाटला रक्ता द्युतिर्यस्य तत् तथाभूतं करिष्यामि।

† नष्टं पलायितम्। नशधातोर्भावे क्तः। हताः रुद्धवीर्याः। महौषधेः विशल्यकरणीनामधेयस्य गन्धमादनेन सह हनूमतानीतस्य अतिप्रबलशक्तेः औषधस्य, गुणनिधेः अद्भुतगुणनिधानस्य

तदादेशय मार्गम्, येन वयमद्य तद्वलोकनेन चक्षुषः फलमनुभवामः।

विदू। साटोपम् *। एदु एदु भवं।

राजा। गच्छाग्रतः।

उभौ। सगर्वं परिक्रामतः।

विदू। आकर्ण्य, सभयं निष्टत्य, राजानं गृहीत्वा, ससम्भ्रमम्। भो वअस्स! एहि, पलाअम्ह (१)।

राजा। किमर्थम्?

विदू। भो! एतस्मिं वउलपादवे कोवि भूदो पडिवसदि (२)

राजा। धिङ्मूर्ख! विस्रब्धं गम्यतां कुत ईदृशानामत्र सम्भवः †।

विदू। फुडक्खरं एव्वं मन्तेदि; जइ मम वअणं ण पतिआअसि, ता अग्गदो भविअ, सअं एव्व आअण्णहि (३)।

राजा। तथा कृत्वा श्रुत्वा च।

स्फुटाक्षरमिदं तावन्मधुरं स्त्रीस्वभावतः।
अल्पाक्षरत्वादनिर्ह्रादि मन्ये वदति सारिका॥ ‡॥

ऊर्ध्वं निरूप्य स्मितं कृत्वा। सारिकेयम्।

---

(१) भो वयस्य! एहि पलायावहे।

(२) अस्मिन् बकुलपादपे, कोपि भूतः प्रतिवसति।

(३) स्फुटाक्षरमेव मन्त्रयति; यदि मम वचनं न प्रत्येषि, तदग्रतो भूत्वा, स्वयमेव तावदाकर्णय।

---

* साटोपं साहङ्कारम्।

† सम्भव इत्यत्र क्वचित् प्रभाव इति पाठः।

‡ स्फुटानि अक्षराणि यस्मिन् तत्। अल्पाक्षरत्वात् स्वल्पकलेवरत्वात् अनिर्ह्रादि अनुच्चैःशब्दवत्। क्वचित् तावदित्यत्र यस्मादिति पाठः।

विदू। जइ निरूवअ। कधं सच्चं एव्व सारिका? (१)।

राजा। विहस्य। एवम्।

विदू। भो वअस्स! तुमं भआलुओ, जेण सारिअं भूदेत्ति मन्तेसि (२)।

राजा। धिङ्मूर्ख! यदात्मकृतं तन्मयि सम्भावयसि।

विदू। भो! जइ एवं मा क्खु मं णिवारिसि। सरोषं दण्ड-काष्ठमुद्यम्य। आ दासिए सारिए! तुमं जाणासि सच्चं एवं बम्हणो भाअदि त्ति; ता इमिणा पिसुणजणहिअअकुडिलेण दण्डकट्ठेण परिपक्क विअ कइत्थफलं, इमादो वउलपादपादो आहणिअ पाडइस्सं (३)। इति हन्तुमुद्यतः।

राजा। निवारयन्। मूर्ख! श्रूयताम्; किमप्येषा रमणीयं व्याहरति, तत्किमेनां त्रासयसि। उभावाकर्णयतः।

विदू। आकर्ण्य। एवंभणादि इमस्स बम्हणस्स भोजनं दिज्जे इति (४)।

राजा। सर्वमप्यौदरिकस्याभ्यवहार * एव पर्य्यवस्यति; तत्सत्यं वद किमालपति सारिका।

---

(१) कथं सत्यमेव सारिका?

(२) भो वयस्य! त्वं भीरुः; येन सारिकां भूत इति मन्त्रयसि।

(३) भो! यद्येवं तदा मा खलु मां निवारय। अरे दासि सारिके! जानासि सत्यमेव ब्राह्मणो विभेति। अनेन पिशुनजनहृदयकुटिलेन दण्डकाष्ठेन, परिपक्वमिव कपित्थफलं, अस्मात् वकुलपादपात् आहत्य पातयिष्यामि। पिशुनजनः खलजनः।

(४) एवं भणति, अस्य ब्राह्मणस्य भोजनं देहीति।

---

* औदरिकस्य उदरपरायणस्य।

विदू। आकर्ण्य। एवं भणादि; सहि! कीस तुए एत्त चित्तफलए अहं आलिहिदा? सहि! किं अकारणे कुप्पसि जादिसो तुए कामदेवो आलिहिदो, तादिसो रदी मए आलिहिदेत्ति; ता भो वअस्स! किं सेदं (१)।

राजा। वयस्य! एवं तर्कयामि; कयापि हृदयवल्लभोऽनुरागादभिलिख्य कामदेवव्यपदेशेन * सखीपुरतः अपङ्कृतः; तत्सख्या अपि प्रत्यभिज्ञाय वैदग्ध्यादसावपि तत्रैव रतिव्यपदेशेन आलिखितेति।

विदू। भो वअस्स! जुज्जदि जुज्जदि (२)। इति कोटिकां ददाति।

राजा। भो वअस्य! तूष्णीं भव; पुनरपि व्याहरति; तच्छृणुवस्तावत्। उभावपि शृणुतः।

विदू। भो वअस्स! एवं भणादि। सहि! मा लज्ज; ईदिसस्स कण्णारअणस्स ईदिसे वरे अहिलासेण होदव्वं (३)।

राजा। अस्ति काचिद्युक्तिः।

विदू। भो वअस्स! मा पण्डिअगव्वं उव्वह; अहं दे एदाएं

---

(१) एवं भणति, सखि! कथं त्वयात्र चित्रफलकेऽहमालिखिता? सखि! किं अकारणे कुप्यसि, यादृशस्त्वया कामदेव आलिखितस्तादृशी रतिर्मया आलिखिता इति; तस्मात् भो वयस्य! किं नु इदम्।

(२) भो वयस्य! युज्यते युज्यते।

(३) भो वयस्य! एवं भणति। सखि! मा लज्ज ईदृशस्य कन्यारत्नस्य ईदृशवरे अभिलाषेण भवितव्यम्।

---

* व्यपदेशेन छलेन।

सुहादो सुणिअ, सव्वं वाक्खाणइस्सं; जा एसा आलिहिदा सा कण्णा दंसणीआ (१)।

राजा। वयस्य! यद्येवमवहितैरेव श्रोतव्यं अस्त्यवकाशो नः कुतूहलस्य।

विदू। भो वअस्स! सुदं तुए, जं एदाए मन्तिदं? सहि! अवणेहि मे इमाइं णलिणीपत्ताइं मुणालिआवलआइं अ, कीस अआरणे अत्ताणं आआसेसि (२)।

राजा। वयस्य! न केवलं श्रुतमभिप्रायोऽपि बुद्धः।

विदू। भो! अज्जवि कुरुकुराअदि एव्वं एसा सारिआ, दासीए धीआ, ता सव्वं सुणिअ वक्खाणइस्सं (३)।

राजा। युक्तमभिहितम्। पुनराकर्णयतः।

विदू। भो वअस्स! एसा क्खु सारिआ; दासीए दुहिदा चउव्वेदी बम्हणो विअ, रिचाइं भणिदुं पउत्ता (४)।

राजा। वयस्य! कथय किमाद्यन्यचेतसा मया नावधारितं, किमनयोक्तमिति।

विदू। भो! एव्वं भणादि। इच्छेति पुनः पठनीयम्।

---

(१) भो वयस्य! मा प्राज्ञंमन्यगर्वमुद्वह, अहं ते एतस्या मुखात् श्रुत्वा, सर्वं व्याख्यास्यामि; या एषा आलिखिता सा कन्या दर्शनीया।

(२) भो वयस्य! श्रुतं त्वया यदेतया मन्त्रितम्। सखि! अपनय मे नलिनीपत्राणि मृणालवलयानि च, किमकारणमात्मानमायासयसि।

(३) भो! अद्यापि कुरुकुरायत्येव एषा सारिका, दास्याः पुत्री, तस्मात् सर्वं श्रुत्वा व्याख्यास्यामि।

(४) भो वयस्य! एषा खलु सारिका दासीदुहिता, चतुर्वेदो ब्राह्मण इव ऋचः पठितुं प्रवृत्ता।

राजा। वयस्य! एवम्विधं भवन्तं ब्राह्मणं मुक्त्वा, कोऽन्य एवम्विधानाश्चर्यमभिज्ञः?

विदू। तदो किं णु एदं? (१)।

राजा। ननु गार्धिकेयम्।

विदू। किं गार्धिआ; तदो किं कहिआ? (२)।

राजा। वयस्य! कयापि श्लाघ्ययौवनया प्रियतममनासाद्यन्या जीवितनिरपेक्षयोक्तम् *।

विदू। उच्चैर्विहस। भोः! किं एदेहिं वक्कभणिदेहिं? उजुअं एव्व किं ण भणासि, जह मं एव्व अणासाअअन्तीएत्ति? अणहा, को अणो कुसुमचावव्ववदेसेण णिल्लवीअदि (३)। हस्ततालं दत्वा उच्चैर्विहसति।

राजा। ऊर्ध्वमवलोक्य। धिङ् मूर्ख! किमुच्चैर्विहसता त्वया त्रासितेयं; येनोड्डीय अन्यत्र क्वापि गता। इति निरूपयतः।

विदू। विलोक्य। एसा कअलीघरं एव्व गदा, ता एहि अणुसरेम्ह (४)। इति परिक्रामतः।

राजा।

दुर्वारां कुसुमशरव्यथां वहन्त्या
तन्वङ्ग्या यदभिहितं पुरः सखीनाम्।

---

(१) तदा किं नु इदम्?

(२) किं गार्धिका; तदा किं कथ्यताम्?

(३) भोः! किमेतैर्वक्रभणितैः? ऋजुकमेव किं न भणसि, यथा मामेवानासाद्यन्या इति, अन्यथा कोऽन्यः कुसुमचापव्यपदेशेन निह्नूयते।

(४) एषा कदलीगृहमेव गता, तस्मादागच्छ अनुसरामः।

---

* अनासादयन्त्या अप्राप्नुवन्त्या। जीवितनिरपेक्षया जीवनाशां परित्यजन्त्या।

तद्भूयः शिशुशुकसारिकाभिरुक्तं
धन्यानां श्रवणपथातिथित्वमेति ॥ * ॥

विदू। भो वअस्स! एदं क्खु कअलीघरअं, जाव पविसह्म (१)। इति प्रविशतः।

विदू। किं एदाए दासीए धीआए सारिआए? इह दाव मन्दमारुदुव्वेल्लन्तबालकअलीदलसीअले सिलातले उपविसिअ, मुहुत्तअं वीसमह्म (२)।

राजा। यदभिरुचितं भवते। इत्युपविशतः।

राजा। दुर्व्वारमिति पुनः पठति।

विदू। पार्श्वतोऽवलोक्य। भो वअस्स! एदेण उग्घाडिअदुवारेण दुट्ठवाणरेण, ताए सारिआए पञ्जरेण होदव्वं (३)।

राजा। वयस्य! निरूप्यताम्।

विदू। जं भवं आणवेदि। परिक्रम्यावलोक्य च। एस चित्तफलओ! जाव णं गेह्णामि। गृहीत्वा निरूप्य च सहर्षम्। भो वअस्स! दिट्ठिआ वड्ढसि (४)।

---

(१) भो वयस्य! इदं खलु कदलीगृहं, यावत् प्रविशामः।

(२) किमेतया दास्याः पुत्र्या सारिकया? इह तावन्मन्दमारुतोद्वेल्लद्बालकदलीशीतले शिलातले उपविश्य, मुहूर्तं विश्राम्यामः। मन्देन मारुतेन वायुना उद्वेल्लन्ति चञ्चलानि बालकदलीदलानि तैः शीतलं तस्मिन्।

(३) भो वयस्य! एतेनोद्घाटितद्वारेण दुष्टवानरेण तस्याः सारिकायाः पञ्जरेण भवितव्यम्।

(४) एष चित्रफलकः, यावदेनं गृह्णामि। भो वयस्य! दिष्ट्या वर्द्धसे।

---

* शिशवः शुकाः सारिकाः ताभिः। श्रवणपथातिथित्वं श्रवणपथस्य अतिथित्वम् कर्णगोचरताम्।

राजा। सकौतुकम्। वयस्य! किमेतत्?

विदू। भो! एदं तं जं मए भणिदं; तुमं च्चेव एत्थ आलिहिदो; अण्णहा को अण्णो कुसुमचापव्यवदेसेण णिल्लवीअदि त्ति (१)।

राजा। सहर्षं हस्तौ प्रसार्य। सखे! दर्शय।

विदू। ण दे दंसइस्सं। सावि कण्णआ एत्थ एव्व आलिहिदत्ति, किं पारितोसिएण विणा ईदिसं कण्णारअणं दंसीअदि? (२)।

राजा। कटकमर्पयन्नेव बलाद्गृहीत्वा पश्यति। विलोक्य सविस्मयम्। वयस्य! पश्य,

लीलावधूतपद्मा पक्षपातमधिकं नः।
मानसमुपैति केयं चित्रगता राजहंसीव ॥ * ॥

अपिच।

विधायापूर्व्वपूर्णेन्दुमस्या मुखमभूद् ध्रुवम्।
धाता निजासनाम्भोजविनिमीलनदुःस्थितः ॥ † ॥

---

(१) इदं तत् यन्मया भणितम्, त्वमेवात्रालिखितः; अन्यथा कोऽन्यः कुसुमचापव्यपदेशेन निह्नूयते इति।

(२) न ते दर्शयिष्यामि। सापि कन्यका अत्रालिखिता। तत् किं पारितोषिकेण विना ईदृशं कन्यारत्नं दर्श्यते?

---

* लीलया विलासेन अवधूतं तिरस्कृतं पद्मं यया सा तथोक्ता राजहंसीपक्षे लीलायां क्रीड़ायां अवधूतं कम्पितं पद्मं यया सा। नः अस्माकं अधिकं अतिशयितं पक्षपातं अनुरागं कथयन्ती सूचयन्ती, अन्यत्र पातं विक्षेपं कथयन्ती चित्रगता आलेख्यलिखिता केयं राजहंसीव अस्माकं मानसमन्तःकरणं मानससरोवरञ्च उपैति प्राप्नोति।

† धाता प्रजापतिः अपूर्व्वपूर्णेन्दुं अभूतपूर्व्वपूर्णचन्द्रसदृशं अस्याः मुखं विधाय

ततः प्रविशति सुसङ्गता सागरिका च।

सुसं। ण समासादिदा अम्हेहिं सारिआ; ता चित्तफलअं वि दाव दुमादो कअलीघरादो गेण्हिअ, लहुं आगच्छम्ह(१)।

साग। सहि! एवं करेम्ह (२)। इत्युपसर्पतः।

विदू। भो वअस्स! कीस उण सा ओणअमुही आलिहिदा (३)।

सुसं। आकर्ण्य। सहि! जहा वसन्तओ मन्तेदि तहा तक्केमि भट्टिणावि एत्थ एव्व होदव्वं; ता कअलीघरगुम्मन्तरिआ भविअ सुणम्ह (४)। इत्युभे आकर्णयतः।

राजा। वयस्य! पश्य पश्य। विधायापूर्वपूर्णेन्दुमित्यादि पुनः पठति।

सुसं! सहि! दिट्ठिआ वड्ढसे, एसो दे वल्लभो, तुमं एव्व वण्णेदि (५)।

---

(१) न समासादिता अस्माभिः सारिका; तस्माच्चित्रफलकमपि अस्मात् कदलीगृहात् गृहीत्वा, लघु आगच्छामः।

(२) सखि! एवं कुर्मः।

(३) भोः! कथमेषा अवनतमुखी आलिखिता?

(४) सखि! यथा वसन्तको मन्त्रयति, तथा तर्कयामि भर्त्रापि इहैव भवितव्यम्; तस्मात् कदलीगृहगुल्मान्तरिता भूत्वा शृणुवः।

(५) सखि! दिष्ट्या वर्द्धसे, एष ते वल्लभस्त्वामेव वर्णयति।

निर्माय निजं स्वकीयं आसनमेवाम्भोजं पद्मं तस्य विनिमीलनं सङ्कोचः तेन दुःस्थितः दुःखेनावस्थितः अभूत्। चन्द्रोदये कमलस्य निमीलनादिति भावः।

राग। सलज्जम्। सहि! कीस परिहाससीलदाए इमं जनं लहुं करेसि? (१)।

विदू। राजानं चालयित्वा। णं भणामि, कीस एसा अवणद-मुही आलिहिदा (२)।

राजा। वयस्य! सारिकयैव सकलमावेदितम्।

सुअं। सहि! दंसिदं सारिआए अत्तणो मेहावित्तणं (३)।

विदू। अवि सुहाअदि दे लोअणं णवेत्ति? (४)।

राग। आकर्ण्य स्वगतं ससाध्वसम्। ण जाणे कीस एसे भणिस्सदि; जं सच्चं एव्व मरणजीविदाणं अन्तरे वट्टामि (५)।

राजा। वयस्य! सुखयतीति किमुच्यते; पश्य

क्रक्रात्क्रूरयुगं व्यतीत्य, सुचिरं भ्रान्त्वा नितम्बस्थले
मध्येऽस्याखिवलीतरङ्गविषमे निष्पन्दतामागता।
मद्दृष्टिस्तृषितेव सम्प्रति श्रनैरारुह्य तुङ्गौ स्तनौ
साकाङ्क्षं मुखरीक्रते जललवप्रस्यन्दिनी लोचने॥ *

---

(१) सखि! किं परिहासशीलतया इमं जनं लघुं करोषि?

(२) ननु भणामि, कथमेषावनतमुखी आलिखिता?

(३) सखि! दर्शितं सारिकया आत्मनो मेधावित्वम्।

(४) अपि सुखयति ते लोचनं नवेति?

(५) न जाने किमेष भणिष्यति; यत्सत्यमेव मरणजीवितयोरन्तरे वर्त्से।

---

* मद्दृष्टिः मदीयनयनयुगलं क्रक्रात् क्रेयात् अस्याः जङ्घयुगं व्यतीत्य व्यतिक्रम्य, नितम्बस्थले जघनप्रदेशे सुचिरं अतिचिरं यावत् भ्रान्त्वा परिभ्रम्य, ततस्त्रिवलीतरङ्गविषमे रोमराजिततरङ्गबन्धुरे मध्ये कटिभागे निष्पन्दतां निश्चलत्वं आगता प्राप्ता सती सम्प्रति तृषितेव तृषाकुलेव श्रनैः सुङ्गौ पीनोन्नतौ स्तनौ कुचौ आरुह्य साकाङ्क्षं जललवप्रस्यन्दिनी, अश्रुबिन्दुस्यन्दिनी लोचने नयने

सुसं। सहि! सुदं तुए? (१)।

साग। तुमं एव्व सुणु, जाए आलेक्खविणासो वण्णीअदि(२)

विदू। फलकं निर्वर्ण्य। भो वअस्स! जस्सु उण इदीसीओवि एव्वं पिअसमागमं बङ्क मण्णन्ति, तस्सुवि उवरि अत्तणो को पराहवो जेण एत्थ एव्व ताए आलिहिदं अत्ताणअं ण पेक्खसि (३)।

राजा। निर्वर्ण्य। वयस्य! अनया लिखितोऽहमिति यत् सत्यमात्मन्येव वज्रमानः तत्कथं न पश्यामि? पश्य

भाति पतितो लिखन्त्यास्या वाष्पाम्बुशीकरकणौघः।
स्वेदोद्गम इव करतलसंसर्गादेव मे वपुषि॥

साग। आत्मगतम्। हिअअ! समस्सु, समस्सस, मणोरहोवि दे एत्तिअं भूमिं गदो (४)।

सुसं। सहि! तुमं एव्व धण्णा, सलाहणीआ अ, जाए भट्टा एव्वं सन्तोसीअदि (५)।

---

(१) सखि! श्रुतं त्वया?

(२) त्वमेव शृणु, यस्या आलेख्यविन्यासो वर्ण्यते। विण्णासं इति क्वचित् पाठः।

(३) भो वयस्य! यस्य दृष्टस्योऽपि एवं प्रियसमागमं बङ्क मन्यन्ते, तस्यापि आत्मनः उपरि कः पराभवः, येन दृष्टैव तया आलिखितं आत्मानं न पश्यसि।

(४) हृदय! समाश्वसिहि, समाश्वसिहि; मनोरथोऽपि ते एतावतीं भूमिं गतः।

(५) सखि! त्वमेव धन्या श्लाघनीया च, यया भर्त्ता एवं सन्तोष्यते।

सङ्कः दृश्यते, यथा तृषिता चातकी पर्व्वतमारुह्य जललवप्रार्थनया नूतनजलधरं सतृष्णमीक्षते तद्वत् मदीयनयनयुगलमपि अस्याः प्रणयजाश्रुवारिबिन्दुं सतृष्णमपेक्षते इति भावः।

विदू। पार्श्वतोऽवलोक्य। भो वअस्स! एदं अवरं सरसकमलिणीदलमुणालविरइदं दूमाएं एव्व मअणावत्थासूअअं लक्खीअदि (१)।

राजा। वयस्य! निपुणमुपलक्षितम्। तथाहि

परिम्लानं पीनस्तनजघनसङ्गादुभयत-
स्तनोर्मध्यस्यान्तः परिमिलनमप्राप्य हरितम्।
इदं व्यस्तन्यासं श्लथभुजलताक्षेपवलनैः
क्षणाङ्गायाः सन्तापं वदति नलिनीपत्रशयनम्॥ *॥

अपिच।

स्थितमुरसि विशालं पद्मिनीपत्रमेतत्
कथयति न तथान्तर्मन्मथोत्तापवत्ताम्।
अतिशयपरितापम्लापिताङ्गा यथास्याः
स्तनयुगपरिणाहं मण्डलाभ्यां ब्रवीति॥ †॥

---

(१) भो वयस्य! इदमपरं सरसकमलिनीदलमृणालविरचितं अस्या एव मदनावस्थासूचकं लक्ष्यते!

---

* पीनयोः पीवरयोः स्तनजघनयोः सङ्गात् संसर्गात् उभयतः पार्श्वयोः परिम्लानं विवर्णमलीमसं तनोः क्षीणस्य मध्यस्य अन्तः परिमिलनं सङ्गं अप्राप्य हरितं स्वभावसिद्धहरिद्वर्णविशिष्टं, श्लथयोः सन्तापशिथिलयोः भुजलतयोः आक्षेपवलनैः चञ्चलचलनैः व्यस्तन्यस्तं इतस्ततः विक्षिप्तं नलिनीपत्रशयनं कोमलकमलपत्रशय्या अस्याः सन्तापं मदनजं तापं वदति प्रकाशयति, एवम्भूतशयनदर्शनेनास्याः सन्तापः स्फुटमनुभीयत इत्यर्थः।

† सन्मथात् उत्तिष्ठति या सा तां तथोक्ताम् कन्दर्पजनिताम्। अतिशयपरितापम्लापिताङ्गा अतिशयपरितापेन म्लापितानि म्लानिमापादितानि अङ्गानि यस्याः सा तस्याः। मण्डलाभ्यां चक्राभ्यां, स्तनयुगस्य परिणाहं विशालतां

विदू। नाट्येन मृणालिकां गृहीत्वा। भो वयस्स! अयं खलूपगतोऽपरत्तस्सा एव पीणत्थणहरकिलन्तकोमलमुणालहारो; ता पेक्खदु भवं (१)।

राजा। गृहीत्वोरसि विन्यस्य। अयि जड़प्रकृते *!

परिच्युतस्तत्कुचकुम्भमध्यात्
किं शोषमायासि मृणालहार!
न सूक्ष्मतन्तोरपि तावकस्य
तत्तावकाशो भवतः कथं स्यात्॥ †॥

सुसं। आत्मगतम्। हद्धी, हद्धी; गुरुआणुराअक्खित्तहिअओ भट्टा असम्बद्धं मन्तिदुं पउत्तो; ता अहो अवरं उण

---

(१) भो वयस्य! अयं खलूपगतोऽपरत्तस्या एव पीनस्तनभरक्लिश्यत्कोमलमृणालहारः तत् पश्यतु भवान्। उपगतः प्राप्तः। पीनस्तनभरक्लिश्यत्कोमलमृणालहारः, पीनौ स्तनौ तयोर्भरेण क्लिश्यत् ग्लानिमापद्यमानः कोमलः मृणालहारः।

ब्रवीति कथयति सूचयतीत्यर्थः। अतिशयपरितापग्लापिताभ्यां इति पाठे तु एतत्पदं मणड्लाभ्यामिति विशिनष्टि। अतिशयपरितापेन ग्लापिते ताभ्याम् इति समासवाक्यम्।

* जड़ा जलमयी बोधविवर्जिता च प्रकृतिः स्वभावो यस्य तत्सम्बोधने।

† रे मृणालहार! तस्याः कुचौ कुम्भाविव तयोर्मध्यात् अतिपीनघनस्तनद्वयाभ्यन्तरात् परिच्युतः विगलितः सन् किं केन दुःखेनेत्यर्थः शोषं शुष्कतामायासि प्राप्नोषि। सन्तापप्रकाशनं तव मूढतामेव कथयतीत्याह तवायं तावकस्तस्य सूक्ष्मतन्तोरपि सूक्ष्मसूत्रस्यापि तत्र स्तनद्वयाभ्यन्तरे अवकाशः स्थानं नास्त्येवेति शेषः भवतः स्थूलस्य कथं स्यात्, न कथमपि सम्भवतीत्यर्थः।

ण जुत्तं अपेक्खिदुं, भोदु एवं दाव। प्रकाशम्। सखि! जस्स किदे तुमं आअदा, सो अअं दे पुरदो चिट्ठदि (१)।

राग। साक्षेपम्। कस्स किदे अहं आअदा? (२)।

सुसं। विहस्य। अयि अण्णसङ्किदे! णं चित्तफलअस्स ता गेण्ह एदं (३)।

राग। सरोषम्। अहं अणिउणा क्खु तुए ईदिसाणं आलावाणं; ता अण्णदो गमिस्सं (४)। इति गन्तुमिच्छति।

सुसं। अदू असहणे! इह दाव मुहुत्तअं चिट्ठ, जाव ईमादो कअलीघरादो चित्तफलअं गेण्हिअ आअच्छामि (५)।

राग। सखि! एवं करेहि (६)।

सुसं। कदलीगृहाभिमुखं परिक्रामति।

विदू। सुसङ्गतां दृष्ट्वा, ससम्भ्रमम्। भो वअस्स! पच्छादेहि एदं चित्तफलअं इमिणा कअलीपत्तेण; एसा क्खु देवीए परिचारिआ सुसङ्गदा आअदा (७)।

---

(१) हा धिक्, हा धिक्, गुरुकानुरागचित्तहृदयो भर्त्ता असम्बद्धं भाषयितुं प्रवृत्तः। तस्मादतोऽपरं पुनर्न युक्तमपेक्षितुं भवतु एवं तावत्। सखि! यस्य कृते त्वमागता, सोऽयं ते पुरतस्तिष्ठति। अपेक्षितम् इत्यत्र उपेक्षितम् इति पाठे औदासीन्येन वर्त्तितुमित्यर्थः।

(२) कस्य कृते अहमागता?

(३) अयि अन्यशङ्किते! नन्वेतच्चित्रफलकस्य; तद्गृहाणेदम्।

(४) अहमनिपुणा खलु तवेदृशानामालापानां, तदन्यतो गमिष्यामि।

(५) अयि असहने! इह तावन्मुहूर्त्तं तिष्ठ, यावदस्मात् कदलीगृहाच्चित्रफलकं गृहीत्वा, आगच्छामि।

(६) सखि! एवं कुरु।

(७) भो वयस्य! प्रच्छादय इदं चित्रफलकं अमुना कदलीपत्रेण; एषा खलु देव्याः परिचारिका सुसङ्गता आगता

राजा। पटान्तेन फलकमाच्छादयति।

सुसं। उपसृत्य। जअदु, जअदु, भट्टा! (१)।

राजा। सुसङ्गते! स्वागतमिहोपविश्यताम्।

सुसं। उपविशति।

राजा। सुसङ्गते! कथमिहस्थोऽहं भवत्या ज्ञातः।

सुसं। ण केवलं देवो; चित्तफलएण सह सव्वोवि वुत्तन्तो मए विण्णादो, ता देवीए गदुअ णिवेदइस्सं(२)। इति गन्तुमिच्छति।

विदू। अपवार्य * सभयम्। भो वअस्स! सव्वं सम्भावीअदि; सुसरा क्खु एसा गब्भदासी; ता परितोसेहि णं (३)।

राजा। युक्तमुक्तं भवता। सुसङ्गतां हस्ते गृहीत्वा, हस्तादवतार्य कटकं, कर्णाभरणं चात्मन उपनीय, सुसङ्गतायै दत्वा। सुसङ्गते! क्रीड़ामात्रमेतत्, अकारणे त्वया देवी न व्यथयितव्या।

सुसं। पसण्णो मे भट्टा; अलं सङ्काए; एदिणा भट्टिणो पसादेण मए कीलिदं एव्व, ता किं कण्णाहरणेण? एसो एव्व मे गुरुओ पसाओ; जं कीस तुए एत्थ चित्तफलए अहं आलिहिदेत्ति कुविदा मे पिअसही सारिआ चिट्ठदि; ता गदुअ, एसा पसादीअदु (४)।

---

(१) जयतु जयतु भर्त्ता।

(२) न केवलं देवश्चित्रफलकेन सह सर्व्वो वृत्तान्तोऽपि मया विज्ञातः; तस्मादेव्यै गत्वा निवेदयिष्यामि।

(३) भो वयस्य! सर्व्वं सम्भाव्यते; सुस्वरा एषा गर्भदासी; तस्मात् परितोषयैनाम्।

(४) प्रसन्नो मे भर्त्ता; अलं शङ्कया, एतेन भर्त्तुः प्रसादेन मया क्रीड़ितमेव, तस्मात् किं कर्णाभरणेन? एष एव मे गुरुः प्रसादः, यत्कथं त्वया अत्र

---

* तद्भवेदपवारितम्। रहस्यन्तु यदन्यस्य पराधृत्य प्रकाश्यते

राजा। ससम्भ्रममुत्थाय। क्वासौ? दर्शय, दर्शय।

सखं। एसा कअलीगुम्मान्तरिदा चिट्ठदि (१)।

विदू। भो! गेण्हामि एदं चित्तफलअं, कदावि दूमिणा पुणोवि कज्जं होदि (२)।

सखं। दूदो दूदो भट्टा। सर्वे कदलीगृहाद्विष्क्रान्ताः।

साग। राजानं दृष्ट्वा, सहर्षं ससाध्वसं सकम्पञ्च स्वगतम्। एणं पेक्खिअ अदिसङ्कसेण ण सक्कणोमि पदादो पदंवि गन्तुं; ता किं वा एत्थ करिस्सं? (३)।

विदू। सागरिकां दृष्ट्वा। हीही भो! अच्चरीअं अच्चरीअं, ईदिसं कण्णारअणं माणुसलोए ण दीसदि; ता तक्केमि पआवदीणोवि एदं णिम्माविअ विम्हओ समुप्पण्णो (४)।

राजा। वयस्य! ममाप्येवं मनसि वर्त्तते।

दृशः पृथुतरीकृता जितनिजाब्जपत्रत्विष-
श्चतुर्भिरपि साधु साध्विति मुखैः समं व्याहृतम्।
शिरांसि चलितानि विस्मयवशात् भ्रुवं वेधसो
विधाय ललनां जगत्त्रयललामभूतामिमाम्॥ *॥

चित्रफलकेऽहमालिखितेति कुपिता मे प्रियसखी सागरिका तिष्ठति तस्मात् गत्वा, एषा प्रसाद्यताम्।

(१) एषा कदलीगुल्मान्तरिता तिष्ठति।

(२) भो! गृह्णामि इदं चित्रफलकं, कदापि अमुना कार्यं भवति।

(३) एनं प्रेक्ष्य, अतिसाध्वसेन न शक्नोमि पदात् पदमपि गन्तुम्; तत् किं वात्र करिष्यामि?

(४) आश्चर्यमाश्चर्यं ईदृशं कन्यारत्नं मानुषलोके न दृश्यते, तस्मात् तर्कयामि प्रजापतेरपि इदं निर्माय विस्मयः समुत्पन्नः।

---

* जगत्त्रयस्य त्रिभुवनस्य ललामभूतां रत्नभूतामिमां ल[illegible]

राग। साक्षेपं सुसङ्गतामालोक्य। सखि! ईदिसो चित्तफलओ तुए आणीदो (१)। इति गन्तुमिच्छति।

राजा।

दृष्टिं रुषा क्षिपसि, भामिनि! यद्यपीमां
स्निग्धेयमेष्यति तथापि न रुक्षभावम् *।
त्यक्त्वा त्वरां, व्रज, पदस्खलितैरयं ते
खेदं गमिष्यति गुरुर्नितरां नितम्बः॥

सुसं। भट्टा! अदिकोपणा क्खु एसा, ता अग्गहत्थेण गेण्हिअ पसादेहि णं (२)।

राजा। सामन्दम्। यथाह भवती। सागरिकां हस्ते गृहीत्वा स्वयंग्रहं नाटयति।

विदू। भो एसा क्खु तुए अपुव्वा सिरी समासादिदा (३)।

राजा। वयस्य! सत्यम्।

श्रीरेषा पाणिरप्यस्याः पारिजातस्य पल्लवः।
कुतोऽन्यथा स्रवत्येष स्वेदक्लान्ह्यामृततद्रवः॥ †॥

---

(१) सखि ईदृशश्चित्रफलकस्त्वया आनीतः।

(२) भर्तः! अतिकोपना एषा, तस्मादग्रहस्तेन गृहीत्वा प्रसादयैनाम्।

(३) भो एषा खलु त्वया अपूर्वा श्रीः समासादिता।

विधाय निर्माय जिता तिरस्कृता निजस्य अञ्जपत्रस्य आसनीभूतकमलदलस्य त्विट् शोभा याभिः ताः सर्वा अपि अष्टौ दृशः चक्षूंषि न पृथुतराः पृथुतराः कृता पृथुतरीकृताः अतिविशालीकृता इत्यर्थः।

* रुक्षभावं रुक्षत्वं कारुण्यमिति यावत्।

† स्वेदः क्लान्हं क्लमं यस्य स चासौ अमृततद्रवश्चेति स्वेदक्लान्हामृततद्रवः एषः [illegible] निष्यन्दं स्रवतीत्यर्थः।

सुसं। सखि! अदक्खिणासि तुमं दाणिं, जा एवं भट्टिणा हत्थेण गहिदावि कोवं न मुञ्चसि (१)।

सारं। सम्भ्रमम्। सुसङ्गदे! अज्जवि ण विरमेसि? (२)।

राजा। अयि! न खलु सखीजने युक्तमेव कोपानुबन्धं कर्तुम्।

विदू। भोदि! बुभुक्खिदो बम्हणो विअ किं कुप्पसि (३)।

सारं। सखि! तुए सह ण बोलइस्सं (४)।

राजा। अयि कोपने! नैतद्युक्तं समानप्रतिपत्तिषु * सखीषु।

विदू। भो! एसा क्खु अवरा देवी वासवदत्ता (५)।

राजा। सचकितं सारिकाया हस्तं मुञ्चति।

सारं। सुसङ्गदे! किं दाणिं एत्थ करिस्सं? (६)।

सुसं। सखि! एदं तमालविडपं अन्तरीअ इदो णिक्कमम्ह (७)। इति निष्क्रान्ते।

राजा। पार्श्वतोऽवलोक्य सविस्मयम्। क्वासौ देवी वासवदत्ता?

---

(१) सखि! अदक्षिणा इदानीमसि त्वं, या एवं भर्त्रा हस्तेन गृहीतापि कोपं न मुञ्चसि।

(२) अयि सुसङ्गते! अद्यापि न विरमसि?

(३) भवति! बुभुक्षितो ब्राह्मण इव किं कुप्यसि?

(४) सखि! त्वया सह न वक्ष्यामि।

(५) भो एषा खलु अपरा देवी वासवदत्ता।

(६) सुसङ्गते! किमिदानीं करिष्यामि?

(७) सखि! इदं तमालविटपमन्तरयित्वा इतो निष्क्रामावः। "सखि एदाए कदलीवीथिआए णिक्कमाम" इति पाठान्तरम्।

---

* समानप्रतिपत्तिषु समाना प्रतिपत्तिः सुखदुःखवेदना यासां ताः तासु।

विदू। भो! मा णं एदं; मए एसा क्खु अवरा देवी वासवदत्ता अदिदीहरोसदाएत्ति भणिदं (१)।

राजा। धिङ्मूर्खं!

प्राप्ता कथमपि दैवात् कण्ठमनीतैव सा प्रकटरागा *।
रत्नावलीव कान्ता मम हस्तात् भ्रंशिता भवता॥

ततः प्रविशति वासवदत्ता काञ्चनमाला च।

वास। हञ्जे कंचणमाले! अध केत्तिअदूरे दाणिं अज्जउत्तेण परिगहिदा णोमालिआ? (२)।

काञ्च। एदं कअलीघरं अदिक्कमिअ दीसदि (३)।

वास। तेण तहिं ज्जेव गच्छह्म (४)।

काञ्च। एदु एदु भट्टिणी (५)। परिक्रामति।

राजा। वयस्य! क्वेदानीं प्रियतमा द्रष्टव्या?

काञ्च। भट्टिणि! जह समीपे भट्टा मन्तेदि, तह तक्केमि भट्टिणीं एव्व पडिवालअन्तो चिट्ठदि, ता उपसप्पदु भट्टिणी (६)

---

(१) भो! मा ननु इदं; मया एषा खलु अपरा देवी वासवदत्ता अतिदीर्घरोषतयेति भणितम्।

(२) सखि काञ्चनमाले! अथ कियद्दूरे इदानीं सा आर्यपुत्रेण परिगृहीता नवमालिका?

(३) इदं कदलीगृहमतिक्रम्य दृश्यते।

(४) तेन तत्रैव गच्छावः।

(५) एतु एतु भर्त्री।

(६) भर्त्रि! यथा समीपे भर्त्ता मन्त्रयति, तथा तर्कयामि भर्त्रीमेव परिपालयंस्तिष्ठति, तस्मादुपसर्पतु भर्त्री।

---

* प्रकटरागा प्रकटः रागः अनुरागः वर्णोत्कर्षश्च यस्याः सा। रत्नावलीव रत्नहार इव। पक्षे सिंहलेश्वरदुहितेत्यर्थः।

वास। उपसृत्य। जअदु, जअदु, अज्जउत्तो (१)।

राजा। अपवार्य। वयस्य! प्रच्छादय चित्रफलकम्।

विदू। गृहीत्वा कक्षे निक्षिपति।

वास। अज्जउत्त! कुसुमिदा णोमालिआ? (२)।

राजा। सविस्मयम्। देवि! प्रथममागतैरस्माभिरयं चिरयसीति कृत्वा न दृष्टा; तदेहि, समेतावेव तां पश्यावः।

वास। निर्वर्ण्य। अज्जउत्तमुहाणुरागादो एव्वमए जाणिदं जहा कुसुमिदा णोमालिआत्ति; ता ण गमिस्सं (३)।

विदू। भोदि, जदू एव्वं, ता जिदं अम्हेहिं (४)। इति वासं प्रसार्य नृत्यति, कक्षात् पतितं फलकं दृष्ट्वा विषादं नाटयति।

राजा। अपवार्य अङ्गुल्या दर्शयन् वसन्तकसुखं पश्यति।

विदू। अपवार्य। भो भो, मा कुप्प; अहं ज्जेव पच्छादइस्सं (५)।

वास। फलकं गृहीत्वा। भट्टिणि! पेक्ख दाव, किं एत्थ चित्तफलए आलिहिदं? (६)।

---

(१) जयतु जयतु आर्यपुत्तः।

(२) आर्यपुत्र! कुसुमिता नवमालिका।

(३) आर्यपुत्रसुखानुरागादेव मया ज्ञातं यथा कुसुमिता नवमालिकेति, गमिष्यामि।

(४) भवति! यद्येवं, तदा जितमस्माभिः।

(५) भो भो मा कुप्य अहमेव प्रच्छादयिष्यामि। "एत्थ जाणिस्सं उत्तरं दादु" इति पाठान्तरम्।

(६) भर्त्रि! पश्य तावत्, किमत्र चित्रफलके आलिखितम्?

वास। निर्वर्ण्य स्वगतम्। अयं अज्जउत्त, इयं उण सागरिआ। प्रकाशं राजानं प्रति। अज्जउत्त! किं एदं? (१)।

राजा। सवैलक्ष्यस्मितं अपवार्य। वयस्य! किं ब्रवीमि?

विदू। अपवार्य। भो मा चिन्तेहि, अहं उत्तरं दाइस्सं। प्रकाशं वासवदत्तां प्रति। भोदि, मा अण्णधा सम्भावेहि अप्पा किल दुक्खेण आलिहीअदित्ति मम वअणं सुणिअ, पिअवअस्सेण एदं आलेक्खविण्णाणं दंसिदं (२)।

राजा। यथाह वसन्तकस्तथैवैतत्।

वास। फलकं निर्दिश्य। अज्जउत्त! एसावि जा अवरा तुह समीवे आलिहिता ता किं अज्जवसन्तअस्स विण्णाणं (३)।

राजा। सवैलक्ष्यस्मितम्। अलमन्यथाशङ्कया, इयं हि स्वचेतसैव परिकल्प्य लिखिता, न तु दृष्टपूर्वा।

विदू। सच्चं सवामि बम्हसुत्तेण, जइ कदापि अम्हेहिं ईदिसी दिट्ठपूव्वा (४)।

काञ्च। अपवार्य। भट्टिणि! कदावि ईदिसं उण घुणक्खरं सव्वदद्दिज्जेव्व, ता अलं कोवेण (५)।

---

(१) अयमार्यपुत्रः, इयं पुनः सागरिका। आर्यपुत्र! किमिदम्?

(२) भोः! मा चिन्तय, अहमुत्तरं दास्यामि। भवति मा अन्यथा सम्भावय आत्मा खलु दुःखेनालिख्यते इति मम वचनं श्रुत्वा, प्रियवयस्येन इदं आलेख्यविज्ञानं दर्शितम्।

(३) आर्यपुत्र! एषापि या अपरा तव समीपे आलिखिता, तत् किमार्यवसन्तकस्य विज्ञानम्।

(४) सत्यं ब्रवीमि ब्रह्मसूत्रेण, यदि कदापि अस्माभिरीदृशी दृष्टपूर्वा।

(५) भर्त्रि! कदापि ईदृशं पुनर्घुणाक्षरं सम्बदत्वेव तस्मादलं कोपेन।

वास। अपवार्य। अइ उजुए! एदस्स वक्कभणिदाइं णं आणासि; वसन्तओ क्खु एसो। प्रकाशं राजानं प्रति। अज्जउत्त! मम उण एदं चित्तं पेक्खन्तीए सीसवेअणा समुप्पण्णा, ता सुहं चिट्ठदु अज्जउत्तो, अहं गमिस्सं (१)। इत्युत्थाय गच्छति।

राजा। पटान्तेन गृहीत्वा। देवि!

प्रसीदेति ब्रूयामिदमसति कोपे न घटते
करिष्याम्येवं नो पुनरिति भवेदभ्युपगमः *।
न मे दोषोऽस्तीति, त्वमिदमपि च ज्ञास्यसि रुषा
किमेतस्मिन् वक्तुं क्षममिति न वेद्मि प्रियतमे॥

वास। सविनयं पटान्तमाकर्षन्ती। अज्जउत्त! मा अण्णधा संभावेहि; सच्चं एव्व मं सीसवेअणा बाधेदि; ता गमिस्सं(२)। इति निष्क्रान्ते।

विदू। भो! दिट्ठिआ वड्ढसे, क्खु मेण अदिक्कन्ता एसा वासवदत्ता, अआलवादलिआ (३)।

---

(१) अयि ऋजुके! एतस्य वक्रभणितानि न जानासि; वसन्तकः खल्वेषः। आर्यपुत्र! मम पुनरिदं चित्रं पश्यन्त्याः शीर्षवेदना समुत्पन्ना, तस्मात् सुखं तिष्ठतु आर्यपुत्रोऽहं गमिष्यामि।

(२) आर्यपुत्र! मा अन्यथा सम्भावय, सत्यमेव मां शीर्षवेदना बाधते तस्माद्गमिष्यामि।

(३) भो! दिष्ट्या वर्द्धसे यन्मेनातिक्रान्ता एषा वासवदत्ता, अकालवादलिका। वादाम्बली इति पाठे वातावलीति सं०।

---

* अभ्युपगमः स्वीकारः निजापराधस्वीकार इत्यर्थः, त्वमिदमपि चेत्यत्र प्रणयमिति हि पाठः समीचीनः

राजा। धिङ्मूर्ख! अलं परितोषेण, यान्त्या निगूढो न लक्षितस्त्वया देव्याः कोपानुबन्धः? पश्य

भ्रूभङ्गे सहसोद्गतेऽपि, वदनं नीतं परां नम्रताम्
ईषन्मां प्रति भेदकारि हसितं, नोक्तं वचो निष्ठुरम्।
अन्तर्बाष्पजडीकृतं प्रभुतया चक्षुर्न विस्कारितं,
कोपश्च प्रकटीकृतो दयितया, मुक्तश्च न प्रश्रयः॥

तद्देहि देवीं प्रसादयितुमभ्यन्तरमेव प्रविशावः।

इति निष्क्रान्तौ।

कदलीगृहं नाम

द्वितीयोऽङ्कः।

---

* भ्रूभङ्गे भ्रूकुट्यां सहसा उद्गतेऽपि तत्प्रच्छादनार्थं वदनं परां नम्रतां नीतम्, ईषत् मां प्रति भेदकारि विरूपं हसितं, निष्ठुरं वचो नोक्तम् कोपप्रकाशभयादिति भावः, अन्तर्गतेन वाष्पेन जडीकृतं चक्षुः प्रभुतया विशालतया गाम्भीर्येण वा न विस्कारितं विस्तारितम् वाष्पविगलनभयादिति भावः।

तृतीयोऽङ्कः ।

—oo—

ततः प्रविशति मदनिका ।

मद० । आकाशे * । कौसम्बिए ! अवि दिट्ठा तुए भट्टिणी-सआसे कञ्चनमाला नवेत्ति । आकर्ण्य । किं भणासि, कोवि कालो ताए आअच्छिअ गदाएत्ति; ता कहिं दाणिं पेक्खिस्सं । अग्रतोऽवलोक्य । कहं एसा खु कञ्चणमाला इदो ज्जेव्व आअच्छदि; ता जाव णं उपसप्पामि (१) ।

ततः प्रविशति काञ्चनमाला ।

काञ्च० । सोक्खासम् । साहु रे वसन्तअ ! साहु, अदिसइदो तुए अमच्चजोअन्धरायणो इमाए सन्धिविग्गहचिन्ताए (२) ।

मद० । सस्मितमुपसृत्य । हला कञ्चणमाले ! किं अज्ज वसन्तएण किदं, जेण सो एवं सलाहीअदि (३) ।

---

(१) कौशाम्बिके ! अपि दृष्टा त्वया भर्तुः सकाशे काञ्चनमाला नवेति । किं भणसि ; कोऽपि कालस्तस्या आगत्य गतायाः इति, तत् कुतेदानीं द्रक्ष्यामि । कथमेषा खलु काञ्चनमाला इत एवागच्छति, तदावदेनामुपसर्पामि ।

(२) साधु रे वसन्तक ! साधु, अतिशयितस्त्वया अमात्ययौगन्धरायणः अनया सन्धिविग्रहचिन्तया ।

(३) सखि काञ्चनमाले ! किमद्य वसन्तकेन कृतं, येन स एवं श्लाघ्यते ।

---

* किं ब्रवीषि त्वमित्यादि विना पात्रं ब्रवीति यत्, स्वल्पवानुक्तमप्येक-कृत् स्वादाकाशभाषितम् । विश्वनाथः ।

काञ्च। हला मअणिए! किं तव एदिणा पुच्छिदेण पओअणं; तुमं इमं रहस्सं रक्खिदुं ण पारेसि (१)।

मद। सवामि देवीए चरणेहिं, जइ कस्सवि पुरतो पआसेमि (२)।

काञ्च। जइ एवं ता सुणु; अज्ज खु मए राअकुलादो पडिणिवत्तमाणाए चित्तसालिआदुवारे वसन्तअस्स सुसङ्गदाए सह आलावो सुदो (३)।

मद। सकौतुकम्। सहि! कीदिसो सो आलावो? (४)।

काञ्च। एवं वसन्तएण भणिदं जह, सुसङ्गदे, णहि सागरिअं वज्जिअ पिअवअस्सस्स अण्णं किम्पि असुत्थदाए कारणं; ता एत्थ पडिआरं चिन्तेहि (५)।

मद। तदो सुसङ्गदाए किं भणिदं? (६)।

काञ्च। तदो ताए एवं भणिदं; अज्ज खु देवीए चित्तफलअवुत्तन्तसङ्किदाए, सागरिअं परिरक्खिदुं मम हत्थे समप्पअन्तीए, जं णेवत्थं मे पसादीकिदं; तेण ज्जेव विरूढभट्टिणीवेसं सागरिअं गेण्हिअ, अहम्पि कञ्चणमालावेस-

---

(१) सखि! किं तवैतेन पृष्टेन प्रयोजनम्; त्वमिदं रहस्यं रक्षितुं न पारयसि।

(२) अपे देव्याश्चरणैः, यदि कस्यापि पुरतः प्रकाशयामि।

(३) यद्येवं, तदा शृणु, अद्य खलु मया राजकुलात् प्रतिनिवर्त्तमानया चित्रशालिकाद्वारे वसन्तकस्य सुसङ्गतया सह अयमालापः श्रुतः।

(४) सखि! कीदृशः स आलापः?

(५) एवं वसन्तकेन भणितम्; यथा, सुसङ्गते! नहि सागरिकां वर्ज्जयित्वा प्रियवयस्यस्यान्यत् किमपि असुस्थतायाः कारणम्; तदत्र प्रतीकारं चिन्तय।

(६) तदा सुसङ्गतया किं भणितम्।

धारिणी भविअ, पदोसे सआसं भट्टिणो आगमिस्सं? तुमं पि इच्छिदो ज्जेव पडिवालइस्ससि, तदो माहवीलदामण्डवे ताए सह भट्टिणो सङ्गमो भविस्सदि (१)।

मद। सुसङ्गदे! इदासा क्खु तुमं, जा एवं परिअण-वच्छलं देवीं वञ्चेसि (२)।

काञ्च। हला! दाणिं तुमं कहिं पत्थिदा? (३)।

मद। अस्सत्थसरीरस्स भट्टिणो कुसलवुत्तन्तं जाणिदुं गदा तुमं चिरयसि त्ति, उत्तम्मन्तीए देवीए तुह सआसं पेसिदम्हि (४)।

काञ्च। अदिउजुआ सा देवी, जा एवं पत्तिआअदि। परिक्रम्यावलोक्य च। कहं एत्थ एसो क्खु भट्टा अस्सत्थदामिलेण अत्तणो मअणावत्थं पच्छादअन्तो दन्ततोरणवलहीए उवरि उवविट्ठो चिट्ठदि; ता एहि, एदं वुत्तन्तं भट्टिणीए णिवेदेम्ह (५)। इति निष्क्रान्ते प्रवेशकः।

---

(१) तदा तयैवं भणितम्; अद्य खलु देव्या चित्रफलकदृष्टान्तशङ्कितया, सागरिकां परिरक्षितुं मम हस्ते समर्पयन्त्या, यत्नेपथ्यं मे प्रसादीकृतम्; तेनैव विरचितभर्तृवेषां सागरिकां गृहीत्वा, अहञ्च काञ्चनमालावेषधारिणी भूत्वा, प्रदोषे सकाशं भर्तुरागमिष्यामि; त्वमपीह स्थित एव प्रतिपालयिष्यसि, ततो माधवीलतामण्डपे तया सह भर्तुः समागमो भविष्यति।

(२) सुसङ्गते! कृताशा खलु त्वं, या एवं परिजनवत्सलां देवीं वञ्चयसि।

(३) सखि! इदानीं त्वं कुत्र प्रस्थिता?

(४) अस्वस्थशरीरस्य भर्तुः कुशलवृत्तान्तं ज्ञातुं गता, त्वं चिरयसीति, उत्कण्ठयन्त्या देव्या तव सकाशं प्रेषितास्मि। सनाथौ

(५) अतिऋजुका सा देवी, या एवं प्रत्याययते। कथमत्र एष खलु भर्ता अश्वत्थतामिलेन आत्मनो मदनावस्थां प्रच्छादयन् दन्ततोरणवलभ्यामुपविष्ट-

ततः प्रविशति मदनावस्थां नाटयन्नुपविष्टो राजा।

राजा। सोत्कण्ठं निश्वस्य।

सन्तापो हृदय स्मरानलकृतः सम्प्रत्ययं सह्यताम्
नास्त्येवोपशमोऽस्य तां प्रति पुनः किं त्वं सुधा तास्यसि।
यन्मूढेन मया तदा कथमपि प्राप्तो गृहीत्वा चिरम्
विन्यस्तस्त्वयि सान्द्रचन्दनरसस्पर्शो न तस्याः करः॥ * ॥

अहो महदाश्चर्यम्। तथाहि

मनश्चलं प्रकृत्यैव दुर्लक्ष्यञ्च तथापि मे।
कामेनैतत् कथं विद्धं समं सर्वैः† शिलीमुखैः॥

ऊर्ध्वमवलोक्य। भोः कुसुमधन्वन्

बाणाः पञ्च मनोभवस्य नियतास्तेषामसंख्यो जनः
प्रायोऽस्मद्विध एव लक्ष्य इति यल्लोके प्रसिद्धिं गतम्।
दृष्टं तत्त्वयि विप्रतीपमधुना यस्मादसंख्यैरयम्
विद्धः कामिजनः शरैरशरणो नीतस्त्वया पञ्चताम्॥ ‡॥

स्तिष्ठति; तस्मादेहि अस्य वृत्तान्तं भर्त्रे निवेदयामः। अस्वस्थतामिषेण अस्वस्थताछलेन।

---

* स्मरानलकृतः कन्दर्पवह्न्यग्निजनितः। तां प्रति तां सागरिकामुद्दिश्य सुधा निष्फलं तास्यसि उत्कण्ठां भजसे। तत्प्राप्त्याशा सुदूरमपास्तेत्यर्थः यत् यस्मात् मूढेन निर्बुद्धिना मया तदा सागरिकादर्शनलाभसमये कथमपि महता कष्टेन प्राप्तः लब्धः चिरं बहुकालं गृहीत्वा धृत्वा सान्द्रचन्दनरसस्पर्शः घनचन्दनशीतलस्पर्शः तस्याः करः हे हृदय! त्वयि न विन्यस्तः निहितः। तदानीमवसरत्यागादिदानीमुद्वितन्ते सन्तापप्रसहनमित्यर्थः।

† सर्वैः पञ्चभिरेवेत्यर्थः।

‡ मनोभवस्य सङ्कल्पयोनेः कन्दर्पस्य पञ्च बाणा नियताः नियमेन स्थिता इत्यर्थः प्रायो बाहुल्येन अस्माकं विधेव विधा यस्य स अस्मद्विध एव असंख्यः

विचिन्त्य। तथाहमेवंविधावस्थमात्मानं नानुचिन्तयामि, यथान्तर्गूढकोपसम्भाराया देव्या लोचनगोचरगतां तामेव तपस्विनीं सागरिकाम्। तथाहि;

ह्रिया सर्व्वस्याग्रे नयति विदितास्मीति वदनम्
द्वयोर्द्दृष्ट्वालापं कलयति कथामात्मविषयाम्।
सखीषु क्षेरासु प्रकटयति वैलक्ष्यमधिकम्
प्रिया प्रायेणास्ते हृदयनिहितातङ्कविधुरा ॥ * ॥

प्रेषितश्च मया तद्वात्तान्वेषणाय कथं चिरयति वसन्तकः।

ततः प्रविशति हृष्टो वसन्तकः।

वस। सपरितोषम्। ही ही भो:! कोसम्बीरज्जलाहेणाविण तादिसो पिअवअस्सस्स हिअअपरितोसो आसीत्, जादिसो मम सआसादो अज्ज पिअवअणं सुणिअ हविस्सदि त्ति

सङ्ख्यातीतः कामी जनः तेषां लक्ष्य इति लोके जगति यत् प्रसिद्धिं ख्यातिं गतम् प्राप्तम् अधुना इदानीं त्वयि तत् प्रतीपं विरुद्धं दृष्टं लक्षितम्, यस्मात् अशरणः आश्रयहीनः अयं मद्रूपः कामिजनः त्वया असङ्ख्यैः सङ्ख्यारहितैः नलपञ्चमात्रसङ्ख्यैरित्यर्थः शरैः ताडितः पञ्चतां पञ्चसङ्ख्यतां अथच पञ्चत्वं जीवनावसादमिति यावत् नीतः प्रापितः सर्व्वथा विरुद्धमेतत् यत् तव पञ्च बाणा ह्यसङ्ख्यातां अस्मद्विधाश्च पञ्चतां नीता इत्यर्थः।

* असौ मे प्रिया सागरिका विदिता ज्ञाताऽस्मीति ह्रिया लज्जया सर्व्वस्य अग्रे पुरतः वदनं नयति अपनयति, द्वयोरालापं कथोपकथनं दृष्ट्वा आत्मविषयां कथां कलयति तर्कयति, एतौ मद्विषयकमेवालपत इति विवेचयतीत्यर्थः, सखीषु क्षेरासु सस्निग्धवदनासु अधिकं वैलक्ष्यं लज्जां प्रकटयति प्रकाशयति, अतएव मे प्रिया प्रायेण हृदये निहितः आतङ्को भयं तेन विधुरा विह्वला एव आस्ते वर्त्तते सर्व्वदैव लज्जया कातरतामनुभवतीत्यर्थः। सर्व्वस्याग्रे नयति इत्यत्र सर्व्वस्याधो नयतीति, विधुरा इत्यत्र विधुरं इति च पाठो दृश्यते।

तक्केमि; ता जाव गदुअ पिअवअस्सस्स णिवेदइस्सं। परिक्रम्यावलोक्य च। कथं, एसो पिअवअस्सो जह इमं जेव्व दिसं अवलोअन्तो चिट्ठदि, तह तक्केमि मं जेव्व पडिवालेदि, ता जाव णं उपसप्पामि। इत्युपसृत्य। जअदु जअदु पिअवअस्सो। भो वअस्स! दिट्ठिआ वड्ढसे तुमं समीहिदकज्जसिद्धीए (१)।

राजा। सहर्षम्। वयस्य! अपि कुशलं प्रियायाः सागरिकायाः।

विदू। सगर्व्वम्। भो! अदूरेण सअं एव्व पेक्खिअ जाणिस्सदि (२)।

राजा। सपरितोषम्। वयस्य! दर्शनमपि भविष्यति प्रियायाः?

विदू। साहङ्कारम्। भो:! कीस ण भविस्सदि, जस्स दे उवहसिदविहप्पदिबुद्धिविहवो अहं अमच्चो (३)।

राजा। विहस्य। न खलु चित्रम्; किं न सम्भाव्यते त्वयि? तत्कथय, विस्तरतः श्रोतुमिच्छामि।

विदू। कर्णे एवमेवं कथयति।

---

(१) कौशाम्बीराज्यलाभेनापि न तादृशः प्रियवयस्यस्य हृदयपरितोष आसीत्, यादृशो मम सकाशादद्य प्रियवचनं श्रुत्वा भविष्यतीति; तद्यावन्नत्वः प्रियवयस्यस्य निवेदयामि, कथमेष प्रियवयस्यो यथा इमामेव दिशमवलोकयंस्तिष्ठति, तथा तर्कयामि मामेव प्रतिपालयति; यद्यावदेनमुपसर्पामि। जयतु जयतु प्रियवयस्यः। भो वयस्य! दिष्ट्या वर्द्धसे त्वं समीहितकार्य्यसिद्ध्या। समीहितस्य लब्धुमिष्टस्य कार्य्यस्य सागरिकासन्दर्शनलाभरूपस्य सिद्ध्या सफलतया।

(२) भो, अचिरेण स्वयमेव प्रेक्ष्य ज्ञास्यसि।

(३) भोः, कथं न भविष्यति, यस्य ते उपहसितहसन्तिबुद्धिविभवो अहममात्यः।

राजा। सपरितोषम्। वयस्य! इदं ते पारितोषिकम्। इति हस्तादवतार्य कटकं ददाति।

विदू। कटकं परिधाय आत्मानं निर्व्वर्ण्य सपरितोषम्। भोदु एव्वं दाव, समुद्दसुद्धसोवण्णकडअमण्डिअहत्थं अत्तणो बम्हणीए गदुअ दंसइस्सं (१)।

राजा। सखे! पश्चाद्दर्शयिष्यसि; ज्ञायतां तावत् किमवशिष्टमङ्क इति।

विदू। परिक्रम्यावलोक्य च सहर्षम्। भोः! पेक्ख पेक्ख; एसो क्खु गुरुआणुराअक्खित्तहिअओ, सञ्झावहूदिसङ्केओ विअ, अत्थगिरिसिहरकाणणमणुसरदि भअवं सहस्सरस्सी (२)।

राजा। विलोक्य सहर्षम्। सखे! सम्यगुपलक्षितम्, पर्य्यवसितमहः। तथाहि

अध्वानं नैकचक्रः प्रभवति भुवनभ्रान्तिदीर्घं विलङ्घ्य
प्रातः प्रातुं रथो मे पुनरिति मनसि न्यस्तचिन्तातिभारः।
सन्ध्याक्षुण्णावशिष्टस्फुरपरिकरैः स्पष्टहेमारुणाङ्गैः
व्याक्षेपावस्थितोऽस्ताचलतटमटति न्यग्रतीवैष दिक्चक्रमर्कः॥ *॥

---

(१) भवत्वित्थं तावत्, समुद्रसुद्धसौवर्णकटकमण्डितहस्तं आत्मनो ब्राह्मण्यै ज्ञात्वा दर्शयिष्यामि। समुद्रं सुद्धासहितं शुद्धं निर्मलं सौवर्णं सुवर्णमयं कटकं वलयं तेन मण्डितोहस्तः तम्।

(२) भोः, पश्य पश्य; एष खलु गुरुकानुरागक्षिप्तहृदयः, सन्ध्याबधूदत्तसङ्केत इवास्तगिरिशिखरकाननमनुसरति भगवान् सहस्ररश्मिः।

---

* अध्वानमिति। अस्ताचलेतिभटति अस्ताचले अवस्थितः अस्ताचलचूडावलम्बीत्यर्थः, एष परिदृश्यमानः अर्कः सूर्यः, एकं चक्रं यस्यासौ एकचक्रः, सूर्यरथस्य एकचक्रत्वेन प्रसिद्धेः, एकमात्रेण चक्रेणोह्यमानः मे मम रथः भुवने

अपिच।

यातोऽस्मि पद्मवदने समयो ममैष
सुप्ता मयैव भवती प्रतिबोधनीया।
प्रत्यायनामयमितीव सरोरुहिण्याः
सूर्योऽस्तमस्तकनिविष्टकरः करोति ॥ * ॥

भुवनमण्डले भुवनं व्याप्येत्यर्थः या भ्रान्तिर्भ्रमणं प्रदक्षिणीकरणं तया दीर्घं दीर्घवत् प्रतीयमानं रथस्यैकचक्रत्वात् पथश्च भुवनमण्डलव्यापकत्वात् अध्वनः सुदीर्घत्वं युक्तमेवेति अध्वानं पन्थानं विलङ्घ्य अतिक्रम्य प्रातः उषसि पुनः पुनरपि प्राप्तुं निर्दिष्टस्थानं भुवनालोकनार्थं गन्तुं न प्रभवति प्रभविष्यति। दिवा गोलार्द्धमतिक्रम्य प्रातरेव पुनर्निर्दिष्टस्थानं प्राप्तुं नैव समर्थो भविष्यतीति अनेन प्रकारेण मनसि न्यस्ता (नि+अस+क्त) निश्चिन्ता चिन्तायाः अतिभारो गुरुभारो येन तादृशः सन्, रात्रावेव दीर्घमध्वानमतिक्रम्य रथः प्रातरेव पुनः निर्दिष्टस्थानं प्राप्तुं न शक्नोति चेत् कार्य्यातिक्रमो भविष्यतीति भिया व्याकुलहृदयः सन्, सन्ध्यया आकृष्टाः आकृष्य गृहीताः (सूर्य्यकिरणानां प्रतिफलित्वात् सन्ध्यायाः रञ्जनात्) ये स्वस्य किरणानां परिकराः समूहास्तैः स्पष्टा व्यक्ता हेमारपंक्तिः सान्ध्यसूर्य्यकरैः सह सम्पर्कात् भास्वरा हेमविकारवत् प्रतीयमाना अरपंक्तिः अरपुष्पराजिर्यस्य तत् दिक्चक्रं दिक्रूपचक्रं व्याकृष्य नयतीव निजरथस्यैकचक्रत्ववारणाय दिक्चक्रमस्तीति भ्रमं व्याकृष्य नयतीति भावः एकचक्ररथस्य दूराध्वातिक्रमणासामर्थ्यशङ्कया सूर्य्यो हेमघटितारकचक्रान्तरमाकृष्य नयतीवेत्युत्प्रेक्षा। सन्ध्यागमे दिशः क्रमात् नयनपथबहिर्भूता भवन्तीति तात्पर्य्यम्।

* यातोऽस्मीति। हे पद्मवदने! पद्मान्येव वदनं यस्याः सा तत्सम्बुद्धिः हे कमलिनि! अहं यातोऽस्मि चलितोऽस्मि, यतः एव मम समयो नियमः, विधातृनियमस्तुल्लङ्घ्य ममात्रावस्थानं न सम्भाव्यत एव अतः पुनः शीघ्रमेवागन्तुमहं चलितो मा विमना भूया इति भावः, सुप्ता निद्रिता सुदितेत्यर्थः भवती ममैव प्रतिबोधनीया मयैव पुनरागत्य तव निद्राभङ्गः कार्य्यः, अस्तस्य अस्ताचलस्य मस्तके चूडायां निविष्टाः कराः किरणाः (हस्तौ च) येन सः, अस्ताचलचूडाव-

तदुत्तिष्ठ तत्रैव माधवीलतामण्डपे गत्वा, प्रियतमासङ्केतावसरं प्रतिपालयावः।

विदू। सोभणं भणिदं। इत्युत्तिष्ठति।

विदू। विलोक्य। भो वअस्स! पेक्ख पेक्ख, एसो क्खु बहुलीकिदविरलवणराइसण्णिवेसो, गहीदघणपङ्कपीवरवणवराहमहिसकसणच्छवी, पसरदि पुव्वदिसं पच्छादअन्तो तिमिरसंघाओ (१)।

राज। सहर्षं समन्ताद्विलोक्य। वयस्य! सम्यक् दृष्टम्। तथाहि

पुरः पूर्व्यामेव स्थगयति ततोऽन्यामपि दिशम्
क्रमात् क्रामन्नद्रिद्रुमपुरविगागांस्तिरयति।
उपेतः पीनत्वं तदनु भुवनश्लेक्षणपथम्
तमःसङ्घातोऽयं हरति हरकण्ठद्युतिहरः॥ * ॥

तदादेशय मार्गम्।

---

(१) भोः, पश्य पश्य, एष खलु बहुलीकृतविरलवनराजिसन्निवेशो गृहीतघनपङ्कपीवरवनवराहमहिषकृष्णसारच्छविः प्रसरति पूर्व्वदिशं प्रच्छादयंस्तिमिरसंघातः।

लम्भोत्यर्थः सूर्य्यः सरोरुहिण्याः कमलिन्याः निजपत्न्याः इति प्रागुक्तप्रकारं प्रत्याश्वासनां आश्वासनां करोतीव। यथा प्रवासगमनोन्मुखः कान्तः स्वप्रियामाश्वासयति तद्वत् सूर्य्योऽपि कमलिनीमाश्वासयतीति भावः। कमलिनी सूर्य्यस्य पत्नी, सूर्य्यकिरणसम्पर्कात् च कमलानुन्मीलन्तीति कविसमयप्रसिद्धिः।

* पुर इति। पुरः प्रथमम्। स्थगयति आच्छादयति। अन्यां प्रतीचीम्। क्रामन् अग्रसरः। तिरयति तिरोभूतान् करोति आच्छादयतीत्यर्थः। तमःसङ्घातः तिमिरसमूहः। हरकण्ठद्युतिहरः हरस्य नीलकण्ठस्य कण्ठस्य गलदेशस्य द्युतिं कान्तिं हरति यः स तथोक्तः नीलकण्ठकण्ठवन्नीलच्छविरित्यर्थः गाढनील इति भावः।

विदू। एदु एदु पिअवअस्सो। इति परिक्रामतः।

विदू। निरूप्य। भो वअस्स! एदं क्खु समासण्णं वड्डलपादवदाए पिण्डीकदन्धआरं विअ मअरन्दुज्जाणं; ता कधं एत्थ मग्गो लक्खीअदि (१)।

राजा। गन्धमाघ्राय। वयस्य! गच्छाग्रतः, ननु सुपरिज्ञात एवात्र मार्गः। तथाहि

पाली यं चम्पकानां नियतमयमसौ सुन्दरः सिन्धुवारः
सान्द्रा वीथी तथेयं वकुलविटपिनां पाटलापङ्क्तिरेषा।
आघ्रायाघ्राय गन्धं विविधमधिगतैः पादपैरेवमस्मिन्
व्यक्तिं पन्थाः प्रयाति द्विगुणतरतमोनिद्रुतोऽप्येष चिह्नैः॥*॥

इति परिक्रामतः।

विदू। भो! एदं क्खु निपड़न्त-मत्तमड्ढअर-वड्डलकुसुमामोदवासिददसदिसामुहं मसिणमरगअमणिसिलाकुट्टिमसुहाअन्तचरणसञ्चारसूइदं, तं ज्जेव्व माहवीलदामण्डवं संपत्तम्ह; ता दूह ज्जेव्व चिट्ठदु भवं, जावदहं देवीवेसधारिणीं साअरिअं गेण्हिअ, लहुं आअच्छामि (२)।

---

(१) एतु एतु प्रियवयस्यः। भो वयस्य! इदं समासन्नबकुलपादपतया पिण्डीकृतान्धकारमिव मकरन्दोद्यानम्, तस्मात् कथमत्र मार्गो लक्ष्यते।

(२) भो! इदं खलु निपतन्मत्त-मधुकर-वकुल-कुसुमामोद-वासित-दशदिशामुखं

---

* पालीयमिति। पाली श्रेणी। नियतं निश्चितम्। सान्द्रा घना। वीथी श्रेणी। व्यक्तिं प्रकाशं याति। द्विगुणतरेण अतिसान्द्रेण तमसा तिमिरेण निद्रुत आच्छादितोऽपि एष पन्थाः चिह्नैः चम्पकसिन्धुवारादिलक्षणैः व्यक्तिं प्रकाशं प्रयाति प्राप्नोति, निविड़ेनान्धतमसा आच्छन्नः सुतरां अदृश्योऽपि पन्थाः पूर्वोक्तैर्लक्षणैः व्यक्तमनुमीयते इति भावः।

राजा। वयस्य! तेन हि त्वर्यताम् *।

विदू। वअस्स! मा उत्तम्म, एसो आअदोम्हि (१)। इति निष्क्रान्तः।

राजा। तावदहमप्यस्यां मरकतशिलावेदिकायामुपविश्य, प्रियायाः सङ्केतसमयं प्रतिपालयामि। उपविश्य सचिन्तम्। अहो! कोऽपि कामिजनस्य स्वगृहिणीसमागमपरिभाविनोऽभिनवजनं प्रति पक्षपातः। तथाहि

प्रणयविशदां दृष्टिं वक्त्रे ददाति न शङ्किता
घटयति घनं कण्ठाश्लेषे रसान्न पयोधरौ।
वदति बहुशो गच्छामीति प्रयत्नधृताप्यहो
रमयतितरां † सङ्केतस्था तथापि हि कामिनी॥

अये! कथञ्चिरयति वसन्तकः, तत् किं नु खलु विदितः स्यादयं वृत्तान्तो देव्या वासवदत्तया।

ततः प्रविशति वासवदत्ता काञ्चनमाला च।

वास। हञ्जे कञ्चनमाले! सच्चं एव्व मह वेसधारिणी भविअ, सागरिआ अज्जउत्तं अहिसरिस्सदित्ति? (२)।

मसृण-मरकत-मणिशिला-कृत्रिम-सुखायमान-चरणसञ्चार-सूचितं, तमेव माधवीलतामण्डपं सम्प्राप्ताः स्मः; तस्मादिहैव तिष्ठतु भवान्, यावदहं देवीवेशधारिणीं सागरिकां गृहीत्वा, लघु आगच्छामि।

(१) वयस्य! मा उत्तामय; एष आगतोऽस्मि।

(२) हञ्जे काञ्चनमाले! सत्यमेव मम वेशधारिणी भूत्वा सागरिका आर्यपुत्रमभिसरिष्यतीति?

---

* गम्यतां सत्वरमिहागन्तव्यमिति पाठान्तरम्।

† रमयतितरां अत्यर्थं रमयति प्रीणयति। सङ्केतस्था दत्तसङ्केता, सङ्केतारूढेति यावत्। सङ्केतस्थानस्थितेति वा।

काञ्च। कधं अण्णधा भट्टिणीए निवेदीअदि ? अहंवा चित्तसालिआदुवारे उवविट्ठो वसन्तओ ज्जेव्व दे पच्चअं उप्पादइस्सदि (१)।

वासु। तेण हि तदो तहिं ज्जेव्व गच्छम्ह (२)।

काञ्च। एदु एदु भट्टिणी (३)। इति परिक्रामतः।

ततः प्रविशति कृतावगुण्ठनो वसन्तकः।

विदू। कर्णौ दत्वा। जह अअं चित्तसालिआदुवारे पदसद्दो सुणीअदि, तह तक्केमि आअदा सागरिआत्ति (४)।

काञ्च। भट्टिणि! इअं सा चित्तसालिआ; ता इध ज्जेव्व चिट्ठ; अहं पि वसन्तअस्स सण्णं देमि (५)। इति क्षोटिकां ददाति।

विदू। सहर्षं उपसृत्य सस्मितम्। सुसङ्गदे! सरिसो क्खु तुए किदो कञ्चणमालाए वेसो; अध सागरिआ दाणिं कहिं (६)।

काञ्च। अङ्गुल्या दर्शयन्ती। णं एसा (७)।

---

(१) कथमन्यथा भर्त्रे निवेद्यते ? अथवा चित्रशालिकाद्वारे उपविष्टो वसन्तक एव ते प्रत्ययमुत्पादयिष्यति।

(२) तदा तत्रैव गच्छामः। चलाहि

(३) एतु एतु भवती।

(४) यथा अयं चित्रशालिकाद्वारे पदशब्दः श्रूयते, तथा तर्कयामि आगता सागरिकेति।

(५) भर्त्रि! इयं सा चित्रशालिका; तस्मादिहैव तिष्ठ; अहमपि वसन्तकस्य संज्ञां ददामि।

(६) सुसङ्गते! सदृशः खलु त्वया कृतः काञ्चनमालाया वेशः; अथ सागरिका इदानीं कुत्र ?

(७) ननु एषा।

विदू। दृष्ट्वा सविस्मयम्। एसा पुड्ढं ज्जेव्व देवी वासवदत्ता? (१)।

वास। ससम्भ्रममपवार्य। कहं पञ्चभिसादाह्मि एदेण ता गमिस्सं (२)।

विदू। भोदि सागरिए! इदो आअच्छ (३)।

वास। विहस्य काञ्चनमालामवलोकयति।

काञ्च। भट्टिणि! एवं। अपवार्य विदूषकं अङ्गुल्या तर्जयन्ती। हदास! सुमरिस्ससि एदं वअणं (४)।

विदू। तुवरदु तुवरदु सागरिआ एसो क्खु पुव्वदिसादो उग्गच्छदि भअवं मिअलञ्छणो (५)।

वास। ससम्भ्रममपवार्य। भअवं मिअलञ्छण णमो दे सुज्जुत्तअं दाव ओवारिदसरीरो होहि, जेण पेक्खामि से भावाणुबन्धं (६)। इति परिक्रामति।

राजा। सोत्कण्ठम्, आत्मगतम्। उपस्थितप्रियासमागमस्यापि किमिदमत्यर्थमुत्ताम्यति मे मनः। अथवा

तीव्रः स्मरसन्तापो न तथादौ बाधते यथासन्ने।

---

(१) एषा स्फुटमेव देवी वासवदत्ता।

(२) काञ्चनमाले! कथं प्रत्यभिज्ञातास्मि एतेन तद्गमिष्यामि।

(३) भवति सागरिके! इह आगच्छ।

(४) भर्त्रि! एवमिदम्। हताश! स्मरिष्यसीदं वचनम्।

(५) त्वरतां त्वरतां सागरिका; एष खलु पूर्वदिश उद्गच्छति भगवान् मृगलाञ्छनः।

(६) भगवन् मृगलाञ्छन! नमस्ते सुकृत्तं तावदपवारितशरीरो भव येन प्रेक्षाम्यस्य भावानुबन्धम्।

तपति प्रावृषि नितरामभ्यर्णजलागमो दिवसः ॥ * ॥

विदू। आकर्ण्य। भोदि सागरिए! एसो क्खु पिअवअस्सो तुमं ज्जेव उद्दिसिअ उक्कण्ठाणिब्भरं मन्तेदि; ता निवेदेमि से तुह्मागमणं (१)।

वास। शिरश्चालयति।

विदू। राजानमुपसृत्य। भो वअस्स! दिट्ठिआ वड्ढसे; एसा क्खु मए आणीदा सागरिआ (२)।

राजा। सहर्षं सहसोत्थाय। क्वासौ क्वासौ।

विदू। णं एसा (३)।

राजा। उपसृत्य। प्रिये सागरिके!

शीतांशुर्मुखमुत्पले तव दृशौ पद्मानुकारौ करौ
रम्भागर्भनिभं तवोरुयुगलं बाहू मृणालोपमौ।
इत्याह्लादकराखिलाङ्गि रभसान्निःशङ्कमालिङ्ग्य माम्
अङ्गानि त्वमनङ्गतापविधुराण्येह्येहि निर्वापय ॥ † ॥

---

(१) भवति सागरिके! एष खलु प्रियवयस्यस्त्वामेवोद्दिश्य उत्कण्ठानिर्भरं मन्त्रयति, तन्निवेदयामि तस्मै तवागमनम्।

(२) भो वयस्य! दिष्ट्या वर्द्धसे, एषा खलु मया आनीता सागरिका।

(३) ननु एषा।

---

* बाधते पीड़यति। प्रावृषि वर्षासु। अभ्यर्णः शीघ्रं भावी जलागमो वर्षणं यत्र सः। दृष्टान्तोऽलङ्कारः।

† शीतांशुरिति। आह्लादकराणि! आनन्दसन्दोहप्रदायीनि अखिलानि सर्वाणि अङ्गानि यस्याः सा तत्सम्बुद्धिः, हे आनन्दप्रदायिनि! तव मुखं शीतांशुः चन्द्रः, चन्द्रवत् शोभनमित्यर्थः। तव दृशौ चक्षुषी उत्पले पद्मे, तद्वत् मनोहारिणी इत्यर्थः। करौ पद्मानुकारौ पद्मवत् कोमलौ। तव उरुयुगलं उरुद्वयं रम्भागर्भनिभं रम्भागर्भसदृशं, बाहू मृणालोपमौ मृणाल-

वास। सवाष्पमपवार्य। कञ्चणमाले! एवं सअं मन्तेदि अज्जउत्तो; पुणोवि कहं मं आलविस्सदित्ति; अहो अच्छरीअं (१)।

काञ्च। अपवार्य। भट्टिणि! एवं सेदं किं उण अवरं साहसिआणं पुरिसाणं ण सम्भावीअदि (२)।

विदू। भोदि सागरिए! वीसद्धा भविअ, पिअवअस्सं आलावेहि, अज्जवि दाव सो णिच्चरुट्ठाए देवीए वासवदत्ताए दुव्वअणेहिं कडुइदाइं सोत्ताइं; सम्पदं सुहावेदु तुह मञ्जुरवअणोवण्णासो (३)।

वास। सरोषमपवार्य। हञ्जे कञ्चणमाले! अहं ईदिसी कडुअभासिणी, अज्जवसन्तओ उण पिअंवदो (४)।

काञ्च। अपवार्य अङ्गुल्या तर्जयन्ती। हदास! सुमरिस्ससि एदं वअणं (५)।

विदू। विलोक्य। भो वअस्स! पेक्ख पेक्ख; एसो क्ख

---

(१) काञ्चनमाले! एवं खलु मन्त्रयति आर्यपुत्रः; पुनरपि कथं मां आलपिष्यतीति; अहो आश्चर्यम्।

(२) भर्त्रि! एवमिदं; किं पुनरपरं साहसिकानां पुरुषाणां न सम्भाव्यते।

(३) भवति सागरिके! विश्रब्धा भूत्वा, प्रियवयस्यमालप; अद्यापि तावदस्याः नित्यरुष्टाया देव्या वासवदत्ताया दुर्वचनैः कटूकृतानि श्रोत्राणि, साम्प्रतं सुखयतु तव मधुरवचनोपन्यासः।

(४) हञ्जे काञ्चनमाले! अहमीदृशी कटुभाषिणी आर्यवसन्तकः पुनः प्रियम्वदः।

(५) हताश! स्मरिष्यसि इदं वचनम्।

सदृशौ। रभसात् वेगात्। अनङ्गतापविधुराणि कामानलपीडितानि। निर्वापय शान्तिं प्रापय।

कुविदकामिणीकवोलसप्पहो सव्वं पआसअन्तो, उदिदो भअवं मिअलञ्छणो (१)।

राजा। निरूप्य सखेदम्। प्रिये! पश्य पश्य,

आरुह्य शैलशिखरं त्वद्वदनापहृतकान्तिसर्व्वस्वः।
प्रतिकर्त्तुमिवोर्द्ध्वकरः स्थितः पुरस्तान्निशानाथः॥*॥

अपिच। ननु प्रिये! किन्न दर्शितमनेनोज्झिता जड़त्वम्? कुतः?

किं पद्मस्य रुचिं न हन्ति नयनानन्दं विधत्ते न किम्
दृष्टिं वा भवकेतनस्य कुरुते नालोकमात्रेण किम्।
वक्त्रेन्दौ तव सत्यमेष यदयं शीतांशुरुज्जृम्भते
दर्पः स्यादमृतेन चेदिह तदप्यस्त्येव विम्बाधरे॥†॥

---

(१) भो वयस्य! पश्य पश्य, एवं खलु कुपितकामिनीकपोलसप्रभः सर्व्वं प्रकाशयन्, उदितो भगवान् मृगलाञ्छनः।

---

* आरुह्येति। ऊर्द्ध्वं करः ऊर्द्ध्वं प्रसारितः करः किरणाः हस्तौ च येन सः। उदयाचलाग्रे उत्तिष्ठन्करः, ऊर्द्ध्वबाहुश्च तपश्चरतीति गम्यते। यथा कश्चित् प्रभुहृतसर्व्वस्वस्तत्प्रतीकारार्थमुद्बाहुः सन् तपस्यति, तद्वत् अयं निशानाथः तद्वदनापहृतकान्तिः प्रतीकारार्थं तपश्चरतीवेति भावः।

† किमिति। तव वक्त्रेन्दुः सुखचन्द्रः किं पद्मस्य कमलस्य रुचिं कान्तिं न हन्ति, अपितु हन्त्येवेत्यर्थः यथा शशिकिरणसंस्पर्शात् कमलं मुदितं भवति तद्वत् तव सुखचन्द्रोऽपि निर्जितकमलकान्तिरित्यर्थः। नयनानां लोकलोचनानां आनन्दं आह्लादं किं न विधत्ते विदधाति अपितु विधत्त एवेत्यर्थः। यथा शीतांशुर्लोकलोचनानन्दविधायी तथा त्वन्मुखमपीत्यर्थः वा अथवा आलोकमात्रेण दर्शनमात्रेण किं भवकेतनस्य मीनकेतनस्य कामस्य दृष्टिं प्राबल्यं न कुरुते, अपितु कुरुत एव, चन्द्रस्य यथा कामोद्दीपकत्वं विद्यते तद्वत् तन्मुखस्यापीत्यर्थः, अतएव तव वक्त्रेन्दौ सति यत् अपरः किलैव इत्यर्थः शीतांशुः

वास। सरोषमवगुण्ठनपटमपनीय। अज्जाउत्त! सच्चं एव्व अहं सागरिआ; तुमं उण सागरिओक्खित्तहिअओ, सव्वं एव्व सागरिआमअं पेक्खसि (१)।

राजा। ह्रीडा सवैलक्ष्यम्। हा धिक् कष्टम्; कथं देवी वासवदत्ता! वयस्य! किमेतत्?

विदू। सविषादम्। भो वअस्स! किं अवरं, अम्हाणं जीविदसंसओ जादो एसो (२)।

राजा। उपविश्य अञ्जलिं बद्ध्वा। प्रिये वासवदत्ते! प्रसीद प्रसीद!

वास। तदभिमुखमभूणि निपातयन्ती। अज्जउत्त! मा एव्वं भण, अणत्थगदाइं इमाइं अक्खराइं (३)।

विदू। आत्मगतम्। किं दाणिं एत्थ करिस्सं; भोदु एव्वं दाव। प्रकाशम्। भोदि, महानुभावा खु तुमं, ता खमीअदु दाव एक्को अवराहो पिअवअस्सस्स (४)।

---

(१) आर्यपुत्र! सत्यमेवाहं सागरिका, त्वं पुनः सागरिकोत्क्षिप्तहृदयः, सर्वं सागरिकामयं पश्यसि।

(२) भो वयस्य! किमपरमस्माकं जीवितसंशयो जात एषः।

(३) आर्यपुत्र! मा एवं भण, अनर्थगतान्येतान्यक्षराणि।

(४) किमिदानीमत्र करिष्यामि, भवतु एवं तावत्; भवति महानुभावा खलु त्वम्, तत् क्षम्यतां तावदेकोऽपराधः प्रियवयस्यस्य।

चन्द्र उज्जृम्भते उदेति तत् दृष्यैवेति शेषः। तव मुखस्य चन्द्रस्य च समानकार्यकरत्वेऽपि यत् चन्द्रस्योदयः सुनितरां निष्फल एवेत्यर्थः। ननु शीतांशुरमृतस्याधारभूतो मन्मुखन्तु न तथेति चन्द्रस्यावश्यकत्वमस्त्येवेति चेन्न। चेत् यदि अमृतेन सुधाधारत्वेनास्य दर्पः गर्वः स्यात् स दृष्यैवेति शेषः, तथाहि तदपि इह तव बिम्बाधरे अस्त्येव वर्त्तत एव तवाधरसुधा अमृतानुकारिणीत्यर्थः। अतः तव मुखचन्द्रस्य विद्यमानतायां वास्तवस्य चन्द्रस्य या अवस्थितिः सा निष्फलैवेत्यर्थः।

वास०। अज्ज वसन्तअ णं, पढमसङ्गमे विग्घं करन्तीए मए ज्जेव एदस्स अवरद्धं ण अज्जउत्तेण (१)।

राजा। एवं प्रत्यक्षव्यलीकः * किं ब्रवीमि; तथापि विज्ञापयामि।

आताम्रतामपनयामि विलज्ज एष
लाक्षाकृतां चरणयोस्तव देवि मूर्ध्नां।
कोपोपरागजनितान्तु मुखेन्दुबिम्बे
हर्त्तुं क्षमो यदि परं करुणा मयि स्यात् ॥ † ॥

इति पादयोः पतति।

वास०। हस्तेन वारयन्ती। अज्जउत्त! उट्ठेहि, उट्ठेहि; णिल्लज्जो क्खु सो जणो जो अज्जउत्तस्स ईदिसं हिअअं जाणिअ पुणोवि कुप्पदि, ता सुहं चिट्ठदु अज्जउत्तो, अहं गमिस्सं(२)।

इति गच्छति।

---

(१) आर्य वसन्तक! नतु प्रथमसङ्गमे विघ्नं कुर्वन्त्या मयैव एतस्यापराद्धं न आर्यपुत्रेण।

(२) आर्यपुत्र! उत्तिष्ठोत्तिष्ठ; निर्लज्जः खलु स जनो य आर्यपुत्रस्येदृशं हृदयं ज्ञात्वा, पुनरपि कुप्यति, तस्मात् सुखं तिष्ठत्वार्यपुत्रः, अहं गमिष्यामि।

---

* दृष्टं व्यलीकं अप्रियकार्यं यस्य सः, व्यलीकं त्वप्रियेऽन्हते इत्यभिधानात्।

† आताम्रतामिति। आताम्रतामीषत्ताम्रवर्णत्वम्। विलज्जो लज्जितः। लाक्षाकृतामलक्तकरसजनिताम्। मुखेन्दुबिम्बे मुखचन्द्रे, कोपोपरागजनितां मानकोपराङ्ग्यासजनितां आताम्रतां तु अहं हर्त्तुं अपनेतुं क्षमः परं किन्तु यदि मयि करुणा अनुग्रहः स्यात् तदैवेत्यर्थः, करुणया अनुमन्यसे चेत् चुम्बनेन कोपजनितं मुखरागमपनयामीत्यर्थः।

कञ्चु। भट्टिणि करेहि पसादं, एवं चरणपडिअं महाराअं उज्झिअ, गदाए देवीए अवस्सं पच्छादावेण होदव्वं (१)।

वास। अवेहि, अपण्डिदे! कुदो एत्थ पसादस्स पच्छादावस्स वा कारणं ता गच्छह्म (२)। इति निष्क्रान्ते।

राजा। देवि! प्रसीद प्रसीद।

विदू। भो! उट्ठेहि, गदा सा वासवदत्ता देवी, ता कीस एत्थ अरण्णरुदिदं करेसि (३)।

राजा। सुखमुत्तानीकृत्य *। कथमकृत्वैव प्रसादं गता देवी।

विदू। न कदो कहं पसादो, जं अज्जवि अक्खदसरीरा चिट्ठह्म (४)।

राजा। धिङ्मूर्ख! किमेवमुपहससि मां; ननु त्वत्कृत एवायमापतितोऽस्माकमनर्थक्रमः। यतः

समारूढा प्रीतिः प्रणयवद्धमानादनुदिनम्
व्यलीकं वीक्ष्येदं कृतमकृतपूर्वं खलु मया।
प्रिया मुञ्चत्यद्य स्फुटमसहना जीवितमसौ
प्रकृष्टस्य प्रेम्णः स्खलितमविषह्यं हि भवति॥ †॥

(१) भर्त्रि! कुरुष्व प्रसादं एवं चरणपतितं महाराजमुज्झित्वा गतायां देव्यां अवश्यं पश्चात्तापेन भवितव्यम्।

(२) अपेहि, अपण्डिते! कियत प्रसादस्य पाश्चात्तापस्य वा कारणम्? तस्मात् गच्छामः।

(३) भो! उत्तिष्ठोत्तिष्ठ, गता सा वासवदत्ता देवी, तत् कथमत्र अरण्यरुदितं करोषि।

(४) न कृतः कथं प्रसादो, यदद्यापि वयमक्षतशरीरास्तिष्ठामः।

* उत्तानीकृत्य उन्नमय्य।

† समारूढेति। अनुदिनं प्रतिदिनं प्रणयवद्धमानात् प्रणयादरात्

विदू। भो! रुट्ठा देवी, दाव ण जाणीअदि किं करिस्सदित्ति; सागरिआ उण जीवदि णवेत्ति (१)।

राजा। वयस्य! अहमप्येवं चिन्तयामि। हा प्रिये सागरिके!

ततः प्रविशति वासवदत्तावेशधारिणी सागरिका।

साग। सोद्वेगम्। दिट्ठिआ इमिणा विरइददेवीवेसेण इमादो सङ्गीदसालादो णिक्कमन्ती केणावि ण लक्खिदम्हि; ता दाणिं किं करिस्सं? (२)। इति साशङ्कं चिन्तयति।

विदू। भोः! किं मूढो विअ चिट्ठसि, चिन्तेहि एत्थ पडिआरं (३)।

राजा। वयस्य! तदेव चिन्तयामि। देवीप्रसादं मुक्त्वा नान्यमुपायं पश्यामि; तदेहि तत्रैव गच्छावः। इति परिक्रामतः।

---

(१) भो! रुष्टा देवी तावत् न ज्ञायते किं करिष्यति; सागरिका पुनर्जीवति नवेति।

(२) दिष्ट्या अनेन विरचितदेवीवेशेन अस्याः सङ्गीतशालायाः निष्क्रामन्ती केनापि न लक्षितास्मि; तत् किमिदानीं करिष्यामि?

(३) भोः! किं मूढ इव तिष्ठसि, चिन्तय अत्र प्रतीकारम्।

प्रीतिः समारूढा, सम्यक् दृढिमापन्ना, प्रगाढः प्रणयो जात इत्यर्थः। अत एव प्रिया दयिता वासवदत्ता पूर्वं कृतं कृतपूर्वं प्राक् कदापि न कृतं नूतनं इदं व्यलीकं अप्रियं सागरिकासक्तिरूपं मया कृतं वीक्ष्य दृष्ट्वा खलु निश्चये असहना सोढुमशक्ता सती असौ स्फुटं अद्य जीवितं मुञ्चति उद्बन्धनेन प्राणान् परित्यक्तुमीहते, हि यतोहि प्रकृष्टस्य प्रगाढस्य प्रेम्णः प्रणयस्य स्खलितं अपराधः अविषह्यं असह्यं भवति। प्रगाढे प्रणये नायकस्यापराधश्चेत् कामिन्यः प्राणानपि अकस्मा दुःखात् परित्यक्तुं शक्नुवन्तीति न जाने किमत्र देवीकोपप्रशमनाय विधातव्यमिति भावः।

राग। विदूषकस्य सादरम्। वरं दाणिं सअं ज्जेव असोअपादअले उव्वन्धिअ उवरदा भविस्सं, ण उण विदिदसङ्केतवुत्तन्ताए सुसङ्गदाए सह देवीए परिभूदा चिट्ठिस्सं; ता जाव अहं असोअपादअले गदुअ, जह समीहिदं करिस्सं (१)। इति परिक्रामति।

विदू। आकर्ण्य। चिट्ठ दाव चिट्ठ; भोः! पदसद्दो सुणीअदि; जाणामि कदापि गहिदपच्छादावा पुणोवि देवी आअदा भवे (२)।

राजा। वयस्य! महानुभावा खलु देवी, कदाचिदेवमपि स्यात्; तत् त्वरितं निरूपय।

विदू। जं भवं आणवेदि (३)। इति निष्क्रामति।

राग। उपसृत्य। ता जाव इमाए माहवीलदाए पासं विरइअ इह ज्जेव असोअपादवे अप्पाणअं उव्वन्धिअ, बावादेमि। इति लतापाशं रचयन्ती। हा तात! हा अम्ब! एसा दाणिं अहं अणाधा, असरणा, विवज्जामि मन्दभाइणी (४)। इति कण्ठे लतापाशमर्पयति।

विदू। विलोक्य। का उण एसा; कहं उण वासवदत्ता।

---

(१) वरमिदानीं स्वयमेवात्मानमुद्बध्य उपरता भविष्यामि, न पुनर्विदितसङ्केतवृत्तान्तया सुसङ्गतया सह देव्या परिभूता तिष्ठामि; तद्यावदहमशोकपादपमूले गत्वा, यथासमीहितं करिष्यामि।

(२) तिष्ठ तावत् तिष्ठ; भोः! पदशब्दः श्रूयते; जानामि कदापि गृहीतपश्चात्तापा पुनरपि देवी आगता भवेत्।

(३) यद्देवान् आज्ञापयति।

(४) तद्यावत् अनया माधवीलतया पाशं विरचय्य इहैव अशोकपादपे आत्मानमुद्बध्य, व्यापादयामि। हा तात! हा मातः! एषा इदानीमहमनाथा अशरणा विपद्ये मन्दभागिनी।

ससम्भ्रमम्उच्चैः। भो वअस्स! परित्ताहि परित्ताहि, एसा क्खु देवी वासवदत्ता, अप्पाणअं उब्बन्धिअ वावादेदि (१)।

राजा। ससम्भ्रमम्उपसृत्य। वयस्य! क्वासौ क्वासौ।

विदू। णं एसा।

राजा। कण्ठात् पाशमपनयन्। अयि साहसकारिणि! किमिदमकार्य्यं क्रियते?

मम कण्ठगताः प्राणाः पाशे कण्ठगते तव।
अतः स्वार्थः प्रयत्नोऽयं त्यज्यतां साहसं प्रिये॥ * ॥

आग। राजानं दृष्ट्वा। अय्यो! कधं एसो भट्टा। सहर्षमात्मगतम्। जं सच्चं, एणं पेक्खिअ; पुणोवि मे जीविदाहिलासो सम्वुत्तो; अहवा एणं पेक्खिअ, कदत्था भविअ, सुहेण अप्पाणं उब्बन्धिअ जीविदं परिच्चइस्सं। प्रकाशम्। सुच्चदु सुच्चदु मं भट्टा; पराहीणो क्खु अअं जणो ण उण ईदिसं अवसरं मरिदुं पावेदि; तुमंपि देवीए मा अप्पाणं अवराहिणं करेसि (२)। इति पुनः कण्ठे पाशं दातुमिच्छति।

---

(१) का पुनरेषा; कथं पुनर्देवी वासवदत्ता। भो वयस्य! परित्रायस्व, परित्रायस्व, एषा खलु देवी वासवदत्ता आत्मानमुद्बध्य व्यापादयति।

(२) आश्चर्यम्; कथमेष भर्त्ता, यत्सत्यमेनं दृष्ट्वा पुनरपि मे जीविताभिलाषः संवृत्तः; अथवा एनं दृष्ट्वा, कृतार्था भूत्वा, सुखेन आत्मानं परि-

---

* ममेति। पाशे तव कण्ठगते सति मम प्राणाः कण्ठगताः भवन्ति। त्वयि आत्मानं हन्तुमुद्यतायां अहमपि हतप्रायो भवामीत्यर्थः। अतः हेतोः अयं प्रयत्नः त्वत्प्राणरक्षणप्रयत्नः मम स्वार्थः स्वप्रयोजनसाधनानुकूलः, मम त्वत्प्राणरक्षायै प्रयत्नः निजप्राणरक्षार्थमेवेति भावः। अतएव हे प्रिये! साहसं उद्बन्धनसाहसं त्यज्यताम्। अत्र प्रथमेऽर्द्धे असङ्गतिरलङ्कारः, कार्य्यकारणयोर्भिन्नदेशत्वायामसङ्गतिरिति लक्षणात्।

राजा। निरूप्य सहर्षम्। कथं प्रिया मे सागरिका। इति कण्ठात् पाशमाच्छिद्य।

अलमलमतिमात्रं साहसेनानुना ते
त्वरितमयि विमुञ्च त्वं लतापाशमेनम्।
चलितमपि निरोद्धुं जीवितं जीवितेशे
क्षणमिह मम कण्ठे बाहुपाशं निधेहि॥ * ॥

* इति बाहुपाशमाच्छिद्य कण्ठे ददाति। विदूषकं प्रति। सखे! दूयमनभ्रा दृष्टिः।

विदू। भो! एवं खु इदं, जइ अआलवादावली भविअ ण आअच्छदि देवी वासवदत्ता (१)।

ततः प्रविशति वासवदत्ता काञ्चनमाला च।

वास। हञ्जे कञ्चणमाले! तहा चरणणिवडिदं अज्जउत्तं अवधीरिअ आअच्छन्तीए मए अदिणिट्ठुरं किदं, ता दाणिं सअं एव्व गदुअ अज्जउत्तं अणुणइस्सं (२)।

काञ्च। को अत्थो देवीं वञ्चिअ एवं भणिदुं जाणादि;

त्यक्ष्यामि। मुञ्चतु मुञ्चतु मां भर्त्ता; पराधीनः खल्वयं जनो न पुनरीदृशं अवसरं मर्त्तुं प्राप्नोति; त्वमपि देव्या मा आत्मानं अपराधिनं करोषि।

(१) भो! भो एवम्मिदं, यदि अकालवातावली भूत्वा, न आयाति देवी वासवदत्ता।

(२) हञ्जे काञ्चनमाले! तथा चरणनिपतितं आर्यपुत्रमवधीर्य आगच्छन्त्या मया अतिनिष्ठुरं कृतं, तदिदानीं स्वयमेव गत्वा आर्यपुत्रमनुनेष्यामि।

---

* अलमिति। अनुना साहसेन उद्दम्भनव्यवसायरूपेणेत्यर्थः। चलितमपि निर्गतप्रायमपि, जीवितं मदीयजीवितं निरोद्धुं मम कण्ठे बाहुपाशं निधेहि स्थापय आलिङ्गनप्रदानेन मम गमनोन्मुखं जीवितं रक्षेत्यर्थः। साहसेनेति अलंशब्दयोगेन तृतीया। अतिमात्रमित्यव्ययम्।

वरं सो एव्व देवो दुज्जणो होदु, ण उण देवी ; ता एदु एदु देवी (१)। इति परिक्रामतः।

राजा। अयि सुग्धे! किमद्यापि वयं विफलमनोरथाः क्रियामहे।

काञ्च। भट्टिणि! जह समीवे भट्टा मन्तेदि ; तह तक्केमि, तुमं ज्जेव्व अणुणेदुं आअच्छदि, ता उवसप्पदु भट्टिणी (२)।

वास। सहर्षम्। ता अलक्खिता एव्व पुट्ठदो गदुअ, कण्ठे गेण्हिअ, पसादइस्सं (३)।

विदू। भोदि सागरिए! वीसद्धा भविअ, पिअवअस्सं आलावेहि (४)।

वास। कर्णौ दत्वा सकोपम्। कञ्चणमाले! सागरिआवि एत्थ एव्व चिट्ठदि, ता सुणह ; दाव जाणिअ, पच्छा उपसप्पिस्सं (५)। इति तथा स्थिते।

राग। भट्टा! किं एदिना अलीअदाक्खिण्णेण, जीविदादोवि अधिअवल्लहाए देवीए, पुणोवि अत्ताणअं अवराहिणं करेसि? (६)।

---

(१) कोऽन्यो देवीं वर्जयित्वा एवं भणितुं जानाति ; वरं स एव देवो दुर्जनो भवतु, न पुनर्देवी ; तत् एतु एतु देवी।

(२) भर्त्रि! यथा समीपे भर्त्ता मन्त्रयति ; तथा तर्कयामि, त्वामेवानुनेतुमागच्छति ; तदुपसर्पतु भर्त्री।

(३) तस्मात् अलक्षितैव पृष्ठतो गत्वा, कण्ठे गृहीत्वा, प्रसादयिष्यामि।

(४) भवति सागरिके! विश्वस्ता भूत्वा ; प्रियवयस्यमालप।

(५) काञ्चनमाले! सागरिकापि अत्रैव तिष्ठति ; तस्मात् शृणुमः तावत्, ज्ञात्वा पश्चादुपसर्पिष्यामि।

(६) भर्त्तः! किमेतेन अलीकदाक्षिण्येन, जीवितादपि अधिकवल्लभाया देव्याः पुनरपि आत्मानमपराधिनं करोषि?

राजा। अयि मिथ्यावादिनी खल्वसि। कुतः

श्वासोत्कम्पिनि कम्पितं स्तनयुगे, मौने प्रियं भाषितम्
वक्त्रेऽस्याः कुटिलीकृतभ्रुणि रुषा यातं मया पादयोः।
इत्थं नः सहजाभिजात्यजनिता सेवैव देव्याः परम्.
प्रेमाबन्धविवर्द्धिताधिकरसा प्रीतिस्तु या सा त्वयि ॥ * ॥

वास। उपसृत्य सरोषम्। अज्जउत्त! सरिसं एदं (१)।

राजा। दृष्ट्वा सवैलक्ष्यम्। देवि! न खल्वकारणेन मामुपालब्धुमर्हसि †। त्वामेव मत्वा वेशसादृश्यविप्रलब्धा वयमिहागताः। तत् क्षम्यताम्। इति पादयोः पतति।

वास। सरोषम्। अज्जउत्त! उट्ठेहि उट्ठेहि; किं अज्जवि सहजाभिजादाए सेवाए दुःखं अणुभवीअदि? (२)।

---

(१) आर्यपुत्र! सदृशमिदम्।

(२) आर्यपुत्र! उत्तिष्ठोत्तिष्ठ; किमद्यापि सहजाभिजातया सेवया दुःखमनुभूयते?

---

* श्वासेति। अस्याः स्तनयुगे श्वासोत्कम्पिनि दीर्घनिश्वासोत्कम्पवति सति मया कम्पितं, मौने मानिन्या अस्यास्तूष्णीम्भावे मया प्रियं चाटु भाषितम्, कोपापनयनाय चाटूक्तिः कृता। अस्या वक्त्रे रुषा प्रणयरोषेण कुटिलीकृतभ्रूणि अस्या भ्रूभङ्गे उद्गत इत्यर्थः मया पादयोः पतितम्, इत्थं अनेन प्रकारेण नः अस्माकं सहजेन स्वाभाविकेन आभिजात्येन कुलमर्य्यादया महत्त्वभावेनेत्यर्थः जनिता उत्पादिता सेवैव परं केवलं देव्याः, मया एवम्भूता सेवैव केवलं देव्यै दीयते। तु किन्तु प्रेमाबन्धेन प्रणयबन्धनेन विवर्द्धितः वृद्धिं गतः अधिकः अतिशयितो रसः अनुरागो यस्यां एवम्भूता या प्रीतिः प्रणयः सा त्वयि। त्वय्येव प्रेमपूर्णं मनः समर्पितं, देव्यै तु बाह्यं सेवमात्रमेव प्रदीयते अतो न मयि कोपः कार्य्य इति भावः।

† उपालब्धुं तिरस्कर्तुम्।

राजा। स्वगतम्। किमेतदपि श्रुतं देव्या? तत् सर्व्वथा देवीप्रसादनोपायं प्रति निराशीभूताः स्मः। इत्यधोमुखस्तिष्ठति।

विदू। भोदि! तुमं किल अत्ताणअं उव्वन्धिअ बाबादेसेत्ति वेससारिच्छमोहिदेण मए पिअवअस्सो एत्थ आणीदो। जइ मम बअणं ण पत्तिआअसि, ता पेक्ख इमं लदापासं (१)। इति लतापाशं दर्शयति।

दासी। सकोपम्। हञ्जे कञ्चणमाले! एदेण एव्व लदापासेण बन्धिअ गेण्ह बम्हणं एणं, दुट्ठकण्णआं अ अग्गदो करेहि (२)।

कांचु। जं देवी आणवेदि। इति लतापाशेन वसन्तकं गले बध्वा, ताड़यति। हदास! अणुभव दाव अत्तणो अविणअस्स फलं, देवीए दुव्वअणेण कडुइदाइं सोत्ताइंत्ति सुमरेहि तं बअणं, सागरिए! तुमंपि अग्गदो होहि (३)।

सागरिका। स्वगतम्। अकिदपुण्णाए मए मरिदुंपि अत्तणो इच्छाए ण पारिदं (४)।

विदू। सविषादम्। भो वअस्स! सुमरेहि मं अणाधं देवीए बन्धणादो विवज्जन्तं (५)। इति राजानमवलोकयति।

सर्व्वानादाय निष्क्रान्ता वासवदत्ता।

---

(१) भवति! त्वं किल आत्मानमुद्बध्य विपद्यसे इति वेत्रसादृश्यमोहितेन मया प्रियवयस्योऽत्र आनीतः। यदि मे वचनं न प्रत्ययसे, तदा पश्य इदं लतापाशम्।

(२) हञ्जे काञ्चनमाले! एतेनैव लतापाशेन बद्धा गृहाणैनं ब्राह्मणम्, इमां दुष्टकन्यकाञ्च अग्रतः कुरु।

(३) हताश! अनुभव तावदात्मनोऽविनयस्य फलं, देव्या दुर्व्वचनेन कटूकृतानि श्रोत्राणीति स्मर तद्वचनम्। सागरिके! त्वमपि अग्रतो भव।

(४) अकृतपुण्यया मया मर्त्तुमपि आत्मन इच्छया न पारितम्।

(५) भो वयस्य! स्मर मामनाथं देव्या बन्धनात् विपद्यमानम्।

राजा। सखेदम्। कष्टं भोः कष्टम्!

किं देव्याः कृतदीर्घरोषसुषितस्निग्धस्मितं तन्मुखम्
किं वा सागरिकां क्रमोद्गतरुषा संसर्ज्यमानां तथा।
बध्वा नीतमितो वसन्तकमहं किं चिन्तयाम्यद्य भोः,
सर्व्वाकारकृतव्यथः क्षणमपि प्राप्नोमि नो निर्वृतिम् ॥ * ॥

तत् किमिदानीमिह स्थितेन प्रयोजनम्, देवीं प्रसादयितुमभ्यन्तरमेव प्रविशामि। इति निष्क्रान्ताः सर्व्वे।

इति सङ्केतो नाम

तृतीयोऽङ्कः।

---

* किमिति। कृतेन दीर्घेण रोषेण सुषितं अपहृतं स्निग्धं हसितं यस्मात् तत् रोषापनीतस्नेहविषदस्मितमित्यर्थः। सन्तर्ज्यमानां देव्या इति शेषः। सर्व्वाकारकृतव्यथः सर्व्वथा दुःखचित्तः। निर्वृतिं निर्वाणं सुखितामिति यावत्।

चतुर्थोऽङ्कः ।

—oo—

ततः प्रविशति रत्नमालामादाय सास्रा सुसङ्गता ।

सुसं । सकरुणम् निश्वस्य । हा पिअसहि सागरिए ! हा लज्जालुए ! हा सहीगणवच्छले ! हा उदारसीले ! हा सोम्मदंसणे ! कहिं गदा दाणिं तुमं मए पेक्खिदव्वा । इति रोदिति । ऊर्ध्वमवलोक्य निश्वस्य च । हंहो देव्वहदअ ! अकरुण ! असामण्णरूपसोहा तादिसी तुए जइ णिम्मिदा, ता कीस उण ईदिसं अवत्थन्तरं पाविदा । इयञ्च रत्नमालावि, जीविदणिरासाए ताए, कस्सवि बम्हणस्स हत्थे पडिवादेसुत्ति भणिअ, मम हत्थे समप्पिता ; ता जाव बम्हणं अण्णेसामि । नेपथ्याभिमुखमवलोक्य । अए कहं एसो क्खु बम्हणो वसन्तओ इध ज्जेव आअच्छदि ; ता इमस्सिं एव्व पडिवादेसि (१) ।

ततः प्रविशति हृष्टो वसन्तकः ।

वस । हीही भोः ! अज्ज क्खु पिअवअस्सेण पसादिदाए

---

(१) हा प्रियसखि सागरिके ! हा लज्जालुके ! हा सखीगणवत्सले ! हा उदारशीले ! हा सौम्यदर्शने ! कुत्र गतेदानीं त्वं प्रेक्षितव्या । हंहो दैवहतक ! अकरुण ! असामान्यरूपशोभा तादृशी त्वया यदि निर्म्मिता, तत् कथं पुनरीदृशमवस्थान्तरं प्रापिता । इयञ्च रत्नमालापि, जीवितनिराशया तया, कस्मायि ब्राह्मणस्य हस्ते प्रतिपादयेति भणित्वा मम हस्ते समर्पिता, तत्पावत् ब्राह्मणमन्वेषयामि । अये कथमेष खलु ब्राह्मणो वसन्तक इहैव आगच्छति, तदस्मै एव प्रतिपादयामि ।

देवीए वासवदत्ताए बम्भणादो मोचिअ, सहत्थदिण्णेहिं मोदअलड्डुएहिं उदरं किदं मे सुपूरिदं; अण्णं च एदं पट्टं अम्बजुअलं, कण्णाभरणं अ दिण्णं; ता जाव दाणिं पिअवअस्सं पेक्खिस्सं (१)। इति परिक्रामति।

सुसं। रुदती सहसोपसृत्य। अज्ज वसन्तअ, चिट्ठ दाव तुमं मुहुत्तअं (२)।

विदू। दृष्ट्वा। कधं सुसङ्गदा? सुसङ्गदे! एत्थ किं णिमित्तं रोदीअदि? किं णु क्खु सागरिआए अच्चाहिदं संवुत्तं (३)।

सुसं। अज्ज वसन्तअ अहं ज्जेव णिवेदइस्सं; सा क्खु तवस्सिणी देवीए उज्जइणिं पेसिदेत्ति जणप्पवादं कदुअ, उवत्थिदे अद्धरत्ते ण जाणीअदि कहिं णीदेत्ति (४)।

विदू। सोदेगम्। भोदि सागरिए! हा असामाणरूअसोहे! हा मिदुभासिणि! अदिणिट्ठुरं दे देवीए किदं (५)।

सुसं। एसा रअणमाला, ताए जीविदणिरासाए अज्ज-

---

(१) अद्य खलु प्रियवयस्येन प्रसादितया देव्या वासवदत्तया बन्धनान्मोचयित्वा स्वहस्तदत्तैर्मोदकलड्डुकैः सुपूरितं उदरं मे कृतम्, अन्यच्चैतत्पट्टमम्बरयुगलं कर्णाभरणञ्च दत्तं, तदावदिदानीं प्रियवयस्यं प्रेक्षिष्ये।

(२) आर्य वसन्तक! तिष्ठ त्वं तावन्मुहूर्तकम्।

(३) सुसङ्गते! अत्र किं निमित्तं रुद्यते? किं नु खलु सागरिकाया अत्याहितं संवृत्तम्।

(४) आर्य वसन्तक! अहमेव निवेदयिष्यामि; सा खलु तपस्विनी देव्या उज्जयिनीं प्रेषितेति जनप्रवादं कृत्वा, उपस्थिते अर्धरात्रे न ज्ञायते कुत्र नीतेति।

(५) भवति सागरिके! हा असामान्यरूपशोभे! हा मृदुभाषिणि, अतिनिष्ठुरं ते देव्या कृतम्।

वसन्तअस्स हत्थे पडिपादेसुत्ति भणिअ, मम हत्थे समप्पिदा; ता णं गेण्हदु अज्जो एदं (१)।

विदू। सास्रं सकरुणं कर्णौ पिधाय। भोदि! कधं मम इदिसे पत्थावे एदं गेण्हिदुं हत्थो पसरदि (२)। इत्युभौ रुदतः।

सुसं। अञ्जलिं बध्वा। ताए एव्व अणुग्गहं करन्तो अङ्गीकरेदु एदं अज्जो (३)।

विदू। विचिन्त्य। अहवा, उवणेहि, जेण इमाए ज्जेव्व सागरिआविरच्छकरिदुं पिअवअस्सं विणोदेमि (४)।

सुसं। वसन्तकस्य हस्ते रत्नमालां ददाति।

विदू। गृहीत्वा, निरूप्य सविस्मयम्। भोदि! कुदो उण इदिसस्स अलङ्कारस्स समागमो? (५)।

सुसं। अज्ज! मएवि कोदूहलेण पुच्छिदं ज्जेव्व (६)।

विदू। तदो ताए किं भणिदं? (७)।

सुसं। तदो सा उड्ढं पेक्खिअ, दीहं णिस्ससिअ, सुसङ्गदे! किं दाणिं तुह इमाए कधाएत्ति भणिअ, रोदिदुं पउत्ता (८)।

---

(१) एषा रत्नमाला, तया जीवितनिराशया आर्यवसन्तकस्य प्रतिपादयेति भणित्वा, मम हस्ते समर्पिता; तत् प्रतीच्छतु एनां आर्यः। गृह्णातु

(२) भवति! कथं ममेदृशे प्रस्तावे इमां गृहीतुं हस्तः प्रसरति।

(३) तस्या एवानुग्रहं कुर्वन् अङ्गीकरोतु आर्यः। एनां

(४) अथवा, उपनय, येनानयैव सागरिकाविरहोत्कण्ठितं प्रियवयस्यं विनोदयामि।

(५) भवति! कुतः पुनरीदृशस्यालङ्कारस्य समागमः?

(६) आर्ये! मयापि कुतूहलेन पृष्टमेव।

(७) तदा तया किं भणितम्?

(८) तदा सा ऊर्ध्वं प्रेक्ष्य दीर्घं निश्वस्य, सुसङ्गते! किमिदानीं तव अनया कथयेति भणित्वा, रोदितुं प्रवृत्ता।

विदू। णं कधिदं एव्व ताए सामण्णजणदुल्लहेण इमिणा परिच्छदेण सव्वधा महाभिजणसमुप्पण्णाए ताए होदव्वं। सुसङ्गदे! पिअवअस्सो दाणिं कहिं? (१)।

सुसं। अज्ज! एसो क्खु भट्टा देवीभवणादो णिक्कमिअ, फडिअसिलामण्डवं गदो; ता गच्छदु अज्जो; अहंवि देवीए वासवदत्ताए परिचारिणी भविस्सं (२)। इति निष्क्रान्तौ प्रवेशकः।

ततः प्रविश्यासनस्थो राजा।

राजा। विचिन्त्य।

सव्याजैः शपथैः प्रियेण वचसा चित्तानुवृत्त्याधिकम्
वैलक्ष्येण परेण पादपतनैर्वाक्यैः सखीनां मुहुः।
प्रत्यासत्तिमुपागता नहि तथा देवी रुदत्या यथा
प्रक्षाल्यैव तयैव बाष्पसलिलैः कोपोऽपनीतः स्वयम्॥ *॥

साकूतं निश्वस्य। तावद्दानीं देव्यां प्रसादितायां, सागरिकाचिन्तैव केवलं मां बाधते। कुतः

(१) ननु कथितमेव मया, सामान्यजनदुर्लभेन अमुना परिच्छदेन सर्वथा महाभिजनसमुत्पन्नया तया भवितव्यम्। सुसङ्गते! प्रियवयस्य इदानीं कुत्र।

(२) आर्य! एष खलु भर्त्ता देवीभवनतो निष्क्रम्य, स्फटिकशिलामण्डपं गतः; तद्गच्छत्वार्यः; अहमपि देव्या वासवदत्तायाः परिचारिणी भविष्यामि।

* सव्याजैरिति। देवी वासवदत्ता, सव्याजैः कृत्रिमघटितैः शपथैः, प्रियेण वचसा चाटूक्त्या, अधिकं चित्तानुवृत्त्या छन्दानुवर्त्तित्वेन, परेण अतिशयितेन वैलक्ष्येण लज्जया, पादपतनैः, सखीनां मुहुर्वचनैः अनुरोधानुनयवाक्यैश्च नहि तथा प्रत्यासत्तिं प्रसन्नतामुपागता, प्रापिता यथा तयैव देव्यैव बाष्पसलिलैः नयनवारिभिः प्रक्षाल्यैव स्वयं कोपः अपनीतः। शपथादिभिर्मयीयैरुपायै देव्याः कोपो न तथा उपशमं नीतः यथा तयैव निर्व्याजरुदितैरिति तात्पर्यम्।

अम्भोजगर्भसुकुमारतनुस्तदासौ
कण्ठग्रहे प्रथमरागघने विलीय।
सद्यः पतन्मदनमार्गणरन्ध्रमार्गैः
मन्ये मम प्रियतमा हृदयं प्रविष्टा ॥ * ॥

विचिन्त्य। योऽपि मे विश्रामस्थानं वसन्तकः, सोऽपि देव्या संयतः, तत् कस्याग्रतो बाष्पमोक्षं करिष्ये। इति निश्वसिति।

ततः प्रविशति वसन्तकः।

वस। परिक्रम्यावलोक्य च सविस्मयम्। एसो क्खु पिअवअस्सो णिरन्तरुक्कण्ठापरिक्खामंपि सलंछणिज्जं तणुं समुव्वहन्तो, उदिदो, दुइआचन्दोविअ अहिअदरं सोहदि; ता जाव णं उपसप्पामि। उपसृत्य। सोत्थि भवदे; दिट्ठिआ वड्ढसे, देवीहत्थगदेणापि मए पुणोवि एदेहिं अच्छीहिं जं दिट्ठोसि (१)।

राजा। दृष्ट्वा सहर्षम्। अये वसन्तकः प्राप्तः। सखे परिष्वजस्व माम्।

---

(१) एष खलु प्रियवयस्यो निरन्तरोत्कण्ठापरिक्षामामपि श्लाघनीयां तनुं समुद्वहन्, उदितो, द्वितीयाचन्द्र इव अधिकतरं शोभते; तद्यावदेनमुपसर्पामि। स्वस्ति भवते, भो दिष्ट्या वर्द्धसे, देवीहस्तगतेनापि मया पुनरपि एतैरक्षिभिर्यद् दृष्टोऽसि।

---

* अम्भोजेति। तदा प्रथमसन्दर्शनकाले अम्भोजगर्भसुकुमारतनुः कमलगर्भवत् कोमलशरीरा असौ-प्रियतमा सागरिका प्रथमरागघने नवानुरागगाढे कण्ठग्रहे विलीय, मदीयदेहे लयं प्राप्तेव सद्यः तत्क्षणात् आलिङ्गनकाल एव पततां निक्षिप्तानां मदनमार्गणानां कन्दर्पशराणां मार्गैः पथिभिः मम हृदयं हृदयाभ्यन्तरं प्रविष्टेति मन्ये। तथाहि हृदयप्रविष्टस्य वस्तुनः चिन्ता सततमेव जनं बाधते।

विदू। परिष्वज्य। भो वअस्स! देवीए अणुग्गहीदोह्मि(१)।

राजा। वेत्रेणैव निवेदितस्ते देव्याः प्रसादः, तत् कथ्यतामिदानीं सागरिकायाः किं वर्त्तत इति।

विदू। सव्वलक्खणमधोमुखत्तिष्ठति।

राजा। वयस्य! किं न कथयसि?

विदू। अप्पियं णिवेदिदुं दे ण पारेमि (२)।

राजा। सोद्वेगम्, ससम्भ्रमम्। वयस्य! कथमप्रियम्? किं व्यक्तमेवोत्सृष्टं जीवितं तया?। हा प्रिये सागरिके!। इति मोहं नाटयति।

विदू। ससम्भ्रमम्। समस्सस दु समस्सस दु, पिअवअस्सो (३)

राजा। समाश्वस्य साक्षम्।

प्राणाः परित्यजत काममदक्षिणं माम्
रे दक्षिणा भवत मद्वचनं कुरुध्वम्।
शीघ्रं न यात यदि तन्मुषिताः स्थ नूनम्
याता सुदूरमधुना गजगामिनी सा॥ *॥

---

(१) भो वयस्य! देव्या अनुगृहीतोऽस्मि।

(२) अप्रियं निवेदितुं ते न शक्नोमि।

(३) समाश्वसितु, समाश्वसितु, प्रियवयस्यः।

---

* प्राणा इति। रे प्राणाः यूयं काममत्यर्थं अदक्षिणं अकरुणं माम् परित्यजत, परित्यज्य अपगच्छत, नहि एवमवस्थायां सागरिकायां प्राणापगमं विना मे शान्तिर्भविष्यतीति भावः। रे प्राणाः दक्षिणा अनुकूला भवत, मम वचनं कुरुध्वं ममानुरोधं प्रतिपालयध्वं। शीघ्रं यदि न यात बहिर्भवत तदा मुषिता वञ्चिता स्थ, यतः अधुना गजगामिनी गजेन्द्रगमना सा मे प्रिया सागरिका सुदूरं याता नहि पुनः प्राप्यते, अतो युष्माकं नहि किमपि प्रयोजनमस्तीति भावः।

विदू। भो! मा अण्णधा सम्भावेहि; सा क्खु तवस्सिणी देवीए उज्जइणिं पेसिदत्ति सुणीअदि; अदो मए अप्पिअंत्ति भणिदं (१)।

राजा। कथमुज्जयिनीं प्रेषिता? अहो निरनुरोधा मयि देवी। वयस्य! केन तवैतदाख्यातम्?।

विदू। भो! सुसङ्गदाए। अण्णं च, मम हत्थे केणावि कज्जेण दूअं रअणमाला पेसिदा (२)।

राजा। किमपरं मामाश्वासयितुम्। तद्वयस्य उपनय।

विदू। उपनयति।

राजा। गृहीत्वा रत्नमालां, निर्वर्ण्य, हृदये निधाय। अहह!

कण्ठाश्लेषं समासाद्य तस्याः प्रभ्रष्टयानया।
तुल्यावस्था सखीवेयं तनुराश्वस्यते मम॥

वयस्य! त्वं परिधत्स्वैनां, येन वयमेनामपि तावद् दृष्ट्वा, धृतिं करिष्यामः।

विदू। जं भवं आणवेदि। इति कण्ठे परिदधाति।

राजा। साधु निश्चयः। वयस्य! दुर्लभं पुनर्दर्शनं प्रियायाः।

विदू। दिशोऽवलोक्य सभयम्। भो! मा एवं उच्चं मन्तेहि, कदाबि कोवि देवीए एत्थ सञ्चरदि (३)।

ततः प्रविशति वेत्रहस्ता वसुन्धरा।

वसु। उपसृत्य। जअदु जअदु भट्टा। एसो क्खु रुमण्णदो

(१) भो! मा अन्यथा सम्भावय; सा खलु तपस्विनी देव्या उज्जयिनीं प्रेषितेति श्रूयते, अतो मया अप्रियमिति भणितम्।

(२) भोः! सुसङ्गतया। अन्यच्च, मम हस्ते तया केनापि कार्य्येण इयं रत्नमाला प्रेषिता।

(३) भो! मा एवं उच्चैः मन्त्रय, कदापि कोऽपि देव्या अत्र सञ्चरति।

भाइणेओ विजअवम्मा, किंपि णिवेदिदुकामो, दुआरे चिट्ठदि (१)।

राजा। वसुन्धरे! अविलम्बितं प्रवेशय।

वसु। जं देवो आणवेदि। निष्क्रम्य, विजयवर्म्मणा सह पुनः प्रविश्य च। विजयवम्म! एसो क्खु भट्टा, ता उपसप्पदु अज्जो णं (२)।

विजयवर्म्मा। उपसृत्य। जयतु जयतु देवः। देव! दिष्ट्या वर्द्धसे, रुमण्वतो विजयेन।

राजा सपरितोषम्। विजयवर्म्मन्! अपि जिताः कोशलाः?

विजय। देवस्य प्रसादात्।

राजा। साधु रुमण्वन्! साधु; अचिरान्महत्प्रयोजनमनुष्ठितम्। विजयवर्म्मन्! तत् कथय कथामतिविस्तरतः श्रोतुमिच्छामि।

विजय। देव! श्रूयताम्। वयमितो देवादेशात् कतिपयैरेवाश्वोभिरनेककरितुरगपत्तिदुर्निवारेण महता बलसमूहेन गताः, रुमण्वान् विन्ध्यप्रदुर्गावस्थितस्य कोशलनृपतेर्द्वारमवष्टभ्य, सेनाः समावेशयितुमारब्धवान्।

राजा। ततस्ततः।

विजय। ततः कोशलेश्वरोऽपि अतिदर्पात् रुमण्वत्परिभवमसहमानो, हास्तिकप्रायमशेषमात्मसैन्यं सज्जीकृतवान्*।

विदू। भो! लद्धं लद्धं आचक्ख, वेवदि मे हिअअं।

(१) जयतु जयतु भर्त्ता; एष खलु रुमण्वतो भागिनेयो विजयवर्म्मा किमपि निवेदयितुकामो द्वारे तिष्ठति।

(२) विजयवर्म्मन्! एष खलु भर्त्ता, तदुपसर्पतु आर्य एनम्।

* हास्तिकप्रायं हस्तिभूयिष्ठम्।

राजा। ततस्ततः।

विजय। देव! कृतनिश्चयश्चासौ।

योद्धुं निर्गत्य विन्ध्यात्प्रभवदभिमुखस्तत्क्षणं दिग्विभागान्
विन्ध्येनेवापरेण द्विपपतिपृतनापीडबन्धेन रुन्धन्।
देगाद्वाणान् विमुञ्चन्नथ समदगजोत्पिष्टपत्तिर्निपत्य
प्रत्यायाद्वाञ्छिताग्निद्विगुणितरभसं रुमण्वान् क्षणेन ॥*॥

अपिच।

अस्त्रव्यस्तशिरस्त्रशस्त्रकषणैः कृत्तोत्तमाङ्गे क्षणम्
व्यूढास्रक्सरिति स्खलत्प्रहरणे वर्म्मोद्गमद्वल्गिनि।
आहूयाजिमुखे स कोशलपतिर्भग्ने प्रधाने बले—

राजा। कथमस्मदीयान्यपि बलानि भग्नानि?

विजय।

एकेनैव रुमण्वता शरशतैर्मत्तद्विपस्थो हतः ॥†॥

---

* योद्धुमिति। रुमण्वान् सेनापतिः विन्ध्यात् पर्व्वतात् योद्धुं निर्गत्य तत्क्षणं अपरेण विन्ध्येनेव, द्विपपतिपृतनापीडबन्धेन गजेन्द्रसेनासमूहघटनया दिग्विभागान् रुन्धन् व्याप्नुवन्, अथ समदैः मदजलस्रावियुक्तैर्गजैः उत्पिष्टा विनाशिताः पत्तयः पदातयो येन स तादृशः सन् निपत्य अग्रसरो भूत्वा वाञ्छिताग्निद्विगुणितरभसः अभीष्टलाभद्विगुणीभूतवेगः सन् तं कोशलाधिपं क्षणेन प्रत्यायात् प्राप्तवान्।

† अस्त्रेति। अस्त्रैर्निक्षिप्तैरिति शेषः व्याप्तानि विभक्तानि शिरोभ्यः पतितानि यानि शिरस्त्राणि शिरोरक्षकाणि शस्त्राणि तैः कषणैः आघातैः कृत्तानि कर्त्तितानि उत्तमाङ्गानि शिरांसि येषु तस्मिन् क्षणं क्षणकालं व्याप्य व्यूढास्रक्सरिति निविड़प्रवहमानरक्तनदीके, स्खलन्ति शस्त्रायमानानि तथा वर्म्मभिः उद्गमन् निर्गच्छन् वल्गिर्यस्मिन् तस्मिन् एवम्भूते आजिमुखे संग्रामसुखे आहूय स कोशलाधिपः प्रधाने बले सैन्ये भग्ने विनष्टे सति एकेनैव असहायेनैव रुमण्वता मत्तद्विपस्थः असौ हतः विनाशितः।

विदू। जेदु जेदु भवं, जिदं अहिं! इति नृत्यति।

राजा। साधु कोशलपते! साधु, नृत्यरूपि ते श्लाघ्यः, यस्य हि रिपवोऽपि पुरुषकारमेवं वर्णयन्ति। ततस्ततः,

विजय। देव! ततो रुमण्वानपि कोशलेषु मद्भ्रातरं ज्यायांसं जयवर्म्माणं स्थापयित्वा, प्रहारव्रणितहास्तिकप्रायमशेषसैन्यमनुवर्त्तमानः शनैः शनैरागच्छ्येव।

राजा। वसुन्धरे! उच्यतां यौगन्धरायणः, प्रदर्श्यतां मत्प्रसादस्य विभव इति।

वसु। जं देवो आणवेदि। विजयवर्म्मणा सह निष्क्रान्ता।

ततः प्रविशति काञ्चनमाला।

काञ्च। आणत्तम्हि देवीए, जह गच्छ, हञ्जे कञ्चणमाले! एदं इन्दजालिअं अज्जउत्तस्स दंसेहि। इति परिक्रम्यावलोक्य च। एसो क्खु भट्टा, ता जाव णं उपसप्पामि। उपसृत्य। जेदु जेदु भट्टा। भट्टा! देवी विण्णवेदि एसो क्खु उज्जयिणीदो सम्बरसिद्धि णाम, इन्दजालिओ आअदो; ता पेक्खदु भट्टा (१)।

राजा। अस्ति नः कौतुकमैन्द्रजालिके; ततः शीघ्रं प्रवेशय।

काञ्च। जं भट्टा आणवेदि। निष्क्रम्य पिच्छिकाहस्तेनैन्द्रजालिकेन सह प्रविशति।

चेटी। एदु एदु अज्जो।

ऐन्द्रजालिकः। परिक्रामति।

---

(१) आज्ञप्ताऽस्मि देव्या, यथा गच्छ; हञ्जे काञ्चनमाले! इममैन्द्रजालिकमार्यपुत्रस्य दर्शय। एष खलु देवः, तद्यावदेनमुपसर्पामि। जयतु जयतु भर्त्ता, देव! देवी विज्ञापयति, एष खलु उज्जयिनीतः, सम्बरसिद्धिनामैन्द्रजालिक आगतः, तत् पश्यतु देवः।

चेटी। एसो भट्टा, तदुवसप्पदु अज्जो (१)।

ऐन्द्र। उपसृत्य। जअदु जअदु भट्टा। पिच्छिकां भ्रामयित्वा बहुधा हासं कृत्वा।

पणमह चलणे इन्दस्स इन्दजालिअत्ति लद्धणामस्स।
तह ज्जेव अज्ज सम्बरस्स मायासुपरिट्ठिदजसस्स॥
देव, किम्

धरणीए मिअङ्को, आआसे महिअरो, जले जलणो।
मज्झण्हम्मि पओसो, दाव सिज्जउ, देहि आणत्तिं (२)॥

विदू। भो वअस्स! अवहिदो होहि; भो! ईदिसो से अवट्ठम्भो जेण सव्वं सम्भावीअदि (३)।

ऐन्द्र। देव! अहवा

किं जम्पिदेण बहुणा, जं जं हिअएण महसि संदट्ठुं।
तं तं दंसेमि अहं, गुरुणो मन्तप्पहावेण॥ (४)।

राजा। भद्र! तिष्ठ तावत्। काञ्चनमाले! उच्यतां देवी, युष्मदीयएवायमैन्द्रजालिकः, विजनीकृतश्चायमुद्देशः; तदागच्छ, सहितावेवैनं पश्यावः।

चेटी। जं भट्टा आणवेदि। निष्क्रम्य वासवदत्तया सह प्रविशति।

---

(१) एष भर्त्ता, तदुपसर्पतु आर्यः।

(२) प्रणमत चरणे इन्द्रस्य इन्द्रजालिकेति-लब्धनाम्नः।
तथैव अद्य सम्बरस्य मायासुप्रतिष्ठितयशसः॥
देव किम्।
धरण्यां मृगाङ्कः, आकाशे महीधरो, जले ज्वलनः।
मध्याह्ने प्रदोषस्तावत् सिध्यतु देहि आज्ञप्तिम्॥

(३) भो वयस्य! अवहितो भव; भोः इदृशोऽवष्टम्भो येन सर्वं सम्भाव्यते।

(४) अथवा
किं जल्पितेन बहुना, यद्यत् हृदयेन वाञ्छसि संद्रष्टुं।
तं तं दर्शयामि अहं, गुरोर्मन्त्रप्रभावेण॥

वास। कञ्चणमाले! उज्जइणीदो आअदोम्हि, अत्थि मे तस्सिं इन्दजालिए बक्खवादो (१)।

काञ्च। णादिउलबद्धमाणो क्खु एसो देवीए, ता एदु एदु भट्टिणी (२)। इति परिक्रामतः।

काञ्च। भट्टिणि! एसो भट्टा, ता उपसप्पदु देवी (३)।

वास। उपसृत्य। जेदु जेदु अज्जउत्तो।

राजा। देवि! बद्धतरमनेन गर्ज्जितम्, तदिहस्थावेवैनं पश्यावः।

वास। उपविशति।

राजा। भद्र! प्रसूयतां बद्धविधमिन्द्रजालम्।

ऐन्द्र। जं देवो आणवेदि। बद्धविधं नाट्यं कृत्वा पिच्छिकां भ्रामयन्।

हरिहरब्रह्मप्पमुहं देवं दंसेमि देवराअं अ।
गअणम्मि सिद्धचारणसुरबद्धसत्थञ्च णच्चन्तं (४)॥

सर्व्वे। सविस्मयम् पश्यन्ति।

राजा। अहो इदं आसनादवतरत्। आश्चर्य्यमाश्चर्य्यम्।

विदू। अच्छरीअं अच्छरीअं।

वास। अच्छरीअं अच्छरीअं।

राजा। देवि! पश्य,

---

(१) काञ्चनमाले! उज्जयिनीत आगत इति, अस्ति मे तस्मिन्नैन्द्रजालिके पक्षपातः।

(२) भ्रातिकुलबद्धमानः खलु एष देव्याः, तदागच्छतु आगच्छतु भर्त्री।

(३) भर्त्रि! एष भर्त्ता, तदुपसर्पतु देवी।

(४) हरिहरब्रह्मप्रमुखान् देवान्, दर्शयामि, देवराजञ्च।
गगने सिद्धचारणसुरवधूसार्थञ्च नृत्यन्तम्॥

एष ब्रह्मा सरोजे रजनिकरकलाशेखरः शङ्करोऽयम्
दोर्भिर्दैत्यान्तकोऽसौ सधनुरसिगदाचक्रचिह्नैश्चतुर्भिः।
एषोऽप्यैरावतस्थस्त्रिदशपतिरमी देवि देवास्तथान्ये
नृत्यन्ति व्योम्नि चैताश्चलचरणरणन्नूपुरा दिव्यनार्यः॥*॥

दास। अज्जरीअं अज्जरीअं।

विदू। अपवार्य। हा दासीए पुत्त इन्दजालिअ! किं एदेहिं, देवेहिं अच्छराहिं च दंसिदाहिं; जइ दे इमिणा परितुट्ठेण कज्जं, ता दंसेहि सागरिअं (१)।

ततः प्रविशति वसुन्धरा।

वसु। राजानमुपसृत्य। जेदु जेदु भट्टा; अमच्चजोअन्धरायणो विण्णवेदि; एसो क्खु विक्कमबाहुणा कञ्चुइणा सह अणुप्पेसिदो वसुभूदी, ता अरिहदि; देवो इमस्सिं एव्व सुन्दरमुहुत्तए पेक्खिदुं; अहंपि कज्जसेसं समापिअ, आअदोज्जेव्व (२)।

दास। अज्जउत्त! चिट्ठदु दाव पेक्खणअं; मादुलकुलादो अज्ज अमच्चप्पधाणो अमच्चवसुभूदी आअदो, ता एदं दाव पेक्खदु अज्जउत्तो (३)।

---

(१) हा दास्याः पुत्र ऐन्द्रजालिक! किमेतैर्देवैरप्सरोभिश्च दर्शिताभिः, यदि ते अहुना परितुष्टेन कार्यं, तत् दर्शय सागरिकाम्।

(२) जयतु जयतु भर्त्ता; अमात्ययौगन्धरायणो विज्ञापयति; एष खलु विक्रमबाहुना कञ्चुकिना सह अनुप्रेषितो वसुभूतिः, तदर्हति देवोऽस्मिन्नेव सुन्दरमुहूर्ते प्रेक्षितुम्; अहमपि कार्यशेषं समाप्यागत एव।

(३) आर्यपुत्र! तिष्ठतु तावत् प्रेक्षणकम्; मातुलकुलाद्यामात्यप्रधानः अमात्यवसुभूतिरागतस्तदिमं तावत् प्रेक्षतामार्यपुत्रः।

---

* एष इति। सरोजे पद्मासने। रजनिकरकलाशेखरः चन्द्रशेखरः। दैत्यान्तको विष्णुः। त्रिदशपतिरिन्द्रः। चलेषु चरणेषु रणन्ति नूपुराणि यासां ताः। दिव्यनार्यः अप्सरसः।

राजा । यथाह देवी । ऐन्द्रजालिकं प्रति । भद्र ! विश्राम्यताम्-इदानीम् ।

ऐन्द्र । पुनः पिच्छिकां भ्रामयति । जं देवो आणवेदि । निष्क्रामन् । मे एक्को उण-खेड्डणओ, अवस्सं देवेण पेक्खिदव्वो (१) ।

राजा । भद्र ! द्रक्ष्यामः ।

वास । कञ्चणमाले ! गच्छ तुमं देहि से पारितोसिअं (२) ।

चेटी । जं देवी आणवेदि । ऐन्द्रजालिकेन सह निष्क्रान्ता ।

राजा । वसन्तक ! प्रत्युद्गम्य, प्रवेश्यतां वसुभूतिः ।

विदू । जं भट्टा आणवेदि । निष्क्रान्तः ।

ततः प्रविशति वसन्तकेन सह वसुभूतिः बाभ्रव्यश्च ।

विदू । एदु एदु अमच्चो ।

वसु । समन्तादवलोक्य । अहो वत्सेश्वरस्यानुभावः * । दूरं हि आच्छिन्नो जयकुञ्जरेण तुरगान् निर्वर्णयन् वल्लभान्
सङ्गीतध्वनिना हृतः क्षितिभृतां गोष्ठीषु तिष्ठन् क्षणम् ।
सद्यो विस्मृतसिंहलेन्द्रविभवः कक्षाप्रदेशेऽप्यहो
द्वार्येनैव कुतूहलेन महता ग्राम्यो यथाहं कृतः ॥ † ॥

बाभ्र । वसुभूते ! अद्य खलु चिरात् स्वामिनं द्रक्ष्यामीति, यत्सम्प्रमानन्दातिशयेन किमप्यवस्थान्तरमनुभवामि । कुतः

(१) ममैकः पुनः खेलनको देवेनावश्यं प्रेक्षितव्यः ।

(२) काञ्चनमाले ! गच्छ त्वं देह्यस्य पारितोषिकम् ।

* भवनद्वारभाग इति पाठान्तरम् ।

† वल्लभान् शुभचिह्नवतः । निर्वर्णयन् पश्यन् । क्षितिभृतां राज्ञाम् । गोष्ठीषु सभासु । सद्यः विस्मृतः सिंहलेन्द्रस्य सिंहलराजस्य विभवः ऐश्वर्यं येन सः । कक्षाप्रदेशे द्वारदेशे । ग्राम्यो यथा, अदृष्टराजभवनविभवः ग्राम्यो जन इव । कृतः विहितः ।

विदूषकं कम्पस्य प्रथयतितरां साध्वसवशात्
अविस्पष्टां दृष्टिं तिरयति पुनर्बाष्पसलिलैः।
स्खलद्वर्णां वाणीं जडयतितरां गद्गदतया
जरायाः साहाय्यं मम हि परितोषोऽद्य कुरुते ॥ * ॥

विदू। अये भूत्वा। एदु एदु अमच्चो।

वसु। विदूषकस्य कण्ठे रत्नमालां दृष्ट्वा, अपवार्य। बाभ्रव्य! जाने; सैवेयं रत्नमाला या देवेन राजपुत्र्यै प्रस्थानसमये दत्तेति।

बाभ्र। अमात्य! अस्ति सादृश्यम्; तत् किं वसन्तकादवगच्छामि प्रभवमस्याः?

वसु। बाभ्रव्य! मा मैवम्; महति राजकुले रत्नबाहुल्यान्न दुर्लभो भूषणानां सम्भवः। इति परिक्रामति।

विदू। राजानमुद्दिश्य। एसो वच्चाहिवो, ता उपसप्पदु अमच्चो (१)।

वसु। उपसृत्य। जयति जयति देवः।

राजा। उत्थाय। अभिवादये।

वसु। श्रेयान् भूयाः।

राजा। आसनमासनमार्याय।

---

(१) एष वत्साधिपस्तदुपसर्पत्वमात्यः।

---

* विदूषकमिति। अद्य मम परितोषः चिरात् राजदर्शनेन जनितः आनन्दः हि निश्चये जरायाः वार्द्धक्यस्य साहाय्यं सहायतां कुरुते। तथाहि, अयं परितोषः साध्वसवशात् भयात् कम्पस्य जराजनितकम्पस्य विदूषकं प्रथयतितरां पृथुतरां करोति, अविस्पष्टां जरसा मन्दीभूतां दृष्टिं बाष्पसलिलैरानन्दाश्रुभिः पुनस्तिरयति आच्छादयति, तथा, गद्गदतया आनन्दातिशयगद्गदतया स्खलद्वर्णां जराखभावात् एव अस्फुटां वाणीं जडयतितरां जडतरां करोति।

विदू। भो! एदमासणं उवविसदु अमच्चो (१)। इत्युत्तरीयं प्रयच्छति।

वसु। उपविशति।

कञ्चु। देव! बाभ्रव्यः प्रणमति।

राजा। पृष्ठे हस्तं दत्वा। बाभ्रव्य! इत आस्यताम्।

कञ्चु। उपविशति।

विदू। अमच्च एसा देवी वासवदत्ता पणमदि (२)।

वसु। अज्ज पणमामि (३)।

वसु। आयुष्मति! वत्सराजसदृशपुत्रमाप्नुहि।

कञ्चुकी। देवि! बाभ्रव्यः प्रणमति।

सर्वे। उपविशन्ति।

राजा। आर्य्ये वसुभूते! अपि कुशलं तत्रभवतः सिंहलेश्वरस्य?

वसु। ऊर्द्धमवलोक्य निश्वस्य च। देव! न जाने, किं विज्ञापयामि मन्दभाग्यः। अधोमुखस्तिष्ठति।

वास। सविषादमात्मगतम्। हद्धी हद्धी; किं दाणिं वसुभूदी कधइस्सदि (४)।

राजा। वसुभूते! कथं पर्य्याकुलेवासि *?

बाभ्र। अपवार्य। चिरमपि स्थित्वा यत् कथनीयं तदिदानीमेव कथ्यताम्।

---

(१) भो! इदमासनमलंकरोपविशत्वार्यः।

(२) अमात्य! एषा देवी वासवदत्ता प्रणमति।

(३) आर्य्ये! प्रणमामि।

(४) हा धिक् हा धिक्; किमिदानीं वसुभूतिः कथयिष्यति?

---

* कथय किमेवं मां पर्य्याकुलयसीति पाठान्तरम्।

वस। सत्यम्। देव! न शक्यं निवेदयितुं तथाप्येष कथयामि मन्दभाग्यः, यासौ तत्रभवतः सिंहलेश्वरस्य दुहिता रत्नावली नामायुष्मती सिद्धादेशेनादिष्टा, योऽस्याः पाणिग्रहणं करिष्यति, स सार्व्वभौमो राजा भविष्यति, तत्प्रत्ययाद्यौगन्धरायणेन बन्धुगुप्तः प्रार्थ्यमाना, सिंहलेश्वरेण वासवदत्तायाश्चित्तखेदं परिहरता, न दत्ता।

राजा। अपवार्य्य। देवि! किमिदमिदानीमलीकं स्वदीयमातुलामात्यः कथयति?

वास। विहस्य। अज्जउत्त! अहंपि ण आणामि, को एत्त अलिअं मन्तेदि? (१)।

विदू। ताए किं संवुत्तं (२)।

वस। ततो लावणकेन वह्निना देवी दग्धेति वार्त्तासुत्पाद्य, देवेन तदन्तिकं बाभ्रव्यः प्रहितः, पुनरपि सा प्रार्थिता च, ततस्तत्रभवता सिंहलेश्वरेण चिन्तितं देवेन सहास्माकं सम्बन्धलोपो मा भूदिति दत्ता सा रत्नावली देवाय प्रतिपादयितुमानीयमाना, समुद्रे यानभङ्गान्निमग्नेति। रुदन्नधोमुखस्तिष्ठति।

वास। सत्यम्। हा हताह्मि मन्दभाइणी, हा बहिणि रअणावलि! कहिं दाणिं सि देहि मे पडिवअणं (३)।

राजा। समाश्वसिहि समाश्वसिहि, दुरवगाहा गतिर्दैवस्य,

---

(१) आर्य्यपुत्र! अहमपि न जानामि, कोऽलीकं मन्त्रयति?

(२) तस्याः किं संवृत्तम्।

(३) हा हताऽस्मि, मन्दभागिनी; हा भगिनि रत्नावलि! क्वेदानिमसि, देहि मे प्रतिवचनम्।

वाहनभङ्गपतितोत्थितौ नन्वेतावेव ते निदर्शनम्। *इति वसुभूति* बाभ्रव्यायै दर्शयति।

बाभ्र। अज्जउत्त! जुज्जदि एवं; परं कुतो मम एत्तिअं भाअधेअं? (१)।

राजा। अपवार्य। बाभ्रव्य! किमेवमिति सर्व्वथा नावगच्छामि।

बाभ्र। देव! श्रूयताम्। नेपथ्ये महान् कलकलः।

हर्म्याणां हेमशृङ्गश्रियमिव निचयैरर्च्चिषामादधानः
सान्द्रोद्यानद्रुमाग्रग्लपनपिशुनितात्यन्ततीव्रप्रतापः।
कुर्व्वन् क्रीड़ामहीध्रं सजलजलधरश्यामलं धूमपातैः
एष श्लोषार्त्तयोषिज्जन इह सहसैवोत्थितोऽन्तःपुरेऽग्निः॥ *

अपिच।

देवीदाहप्रवादोऽयं योऽभूल्लावणके पुरा।
करिष्यन्निव तं सत्यमयमग्निः समुत्थितः॥

सर्व्वे। ससम्भ्रमं पश्यन्ति।

राजा। कथं देवी वासवदत्ता दग्धा। हा प्रिये वासवदत्ते!

---

(१) आर्य्यपुत्र! युज्यते एवं, परं कुतो मे एतावत् भागधेयम्।

---

* हर्म्याणामिति। अर्च्चिषां शिखानां (ज्वालानां) निचयैः समूहैः हर्म्याणां प्रासादानां हेमशृङ्गश्रियमिव, सुवर्णशृङ्गशोभामिव आदधानः जनयन् अर्द्धसुप्ततामिः ज्वालाभिः प्रासादोपरिस्थानि सुवर्णशृङ्गाणि अनुकुर्व्वन्नित्यर्थः। सान्द्रा निविड़संस्था ये उद्यानद्रुमास्तेषां ग्लपनेन ग्लानत्वोत्पादनेन पिशुनितः प्रकटीकृतः अत्यन्ततीव्रः नितरां प्रखरः प्रतापः उत्तापप्राखर्य्यं येन सः, तथा धूमपातैः अर्द्धसुप्तीयमानैर्धूमसमूहैः सजलजलधरश्यामलं नवीनजलदवच्छीलं क्रीड़ामहीध्रं क्रीड़ाशैलं कुर्व्वन्निव, तथा श्लोषेण दाहेन आर्त्तः पीड़ितः योषिज्जनः स्त्रीजनो येन स एवम्भूतः एष साक्षात् परिदृश्यमानः अग्निः सहसैव अकस्मादेव इह अन्तःपुरे उत्थितः प्रज्वलितः।

वास। अज्जउत्त! परित्ताहि परित्ताहि।

राजा। अये! कथमतिसम्भ्रमात् पार्श्वस्थापि देवी नोपलक्षिता। देव्याः पाणिं गृहीत्वा आलिङ्ग्य। देवि! समाश्वसिहि, समाश्वसिहि।

वास। अज्जउत्त! मए अत्ताणो किदे ण भणिदं; किं उण, एसा क्खु मए णिग्घिणाए इध णिअडे संजमिदा सागरिआ विवज्जेदि; ता परित्ताअदु अज्जउत्तो (१)।

राजा। कथं देवि! सागरिका विपद्यते; एष गच्छामि।

वसु। देव! किमिदमकारणमेव पतङ्गवृत्तिः क्रियते?

बाभ्र। देव युक्तमाह वसुभूतिः।

विदू। राजानमुत्तरीये गृहीत्वा। भो! मा क्खु साहसं करेहि(२)।

राजा। उत्तरीयमाकर्षन्। अरे धिङ् मूर्ख! सागरिका विपद्यते, किमद्यापि प्राणाः परिरक्ष्यन्ते?

बाभ्र। किमिदमवस्तुनि भरतकुलं संशयतुलायामारोप्यते। अथवा किं प्रलापैर्भक्तिसदृशं करोमि।

राजा। धूमाभिभवं नाटयति।

विरम विरम वह्ने मुञ्च धूमानुबन्धम्
प्रकटयसि किमुच्चैरर्चिषां चक्रवालम्।
विरहदहनभुजाहं यो न दग्धः प्रियायाः
प्रलयदहनभासा तस्य किं त्वं करोषि॥ * ॥

(१) आर्यपुत्र! मयात्मनः कृते न भणितम्; किं पुनरेषा खलु मया निर्घृणया इह निगडे संयमिता सागरिका विपद्यते; तत् परित्रायतामार्यपुत्रः।

(२) भो! मा खलु साहसं कुरु।

* विरमेति। चक्रवालं समूहम्, प्रकटयसि प्रकाशयसि। विरहदहनभुजा विरहाग्निना। प्रलयदहनभासा प्रलयकालिकाग्निज्वालया।

कथमासन्नऋतवहा वर्त्तते सागरिका, तत्° त्वरितमेनां सम्भावयामि।

वास। कथं मम दुक्खभाइणीए वअणादो एवं ववसिदं अज्जउत्तेण, ता अहंपि अज्जउत्तं जेव्व अणुगमिस्सं (१)।

विदू। परिक्रामन् अग्रतो भूत्वा। भोदि! अहंवि पथोवदेसओ होमि (२)।

उभे। कथं प्रविष्ट एव ज्वलनं वत्सराजः; तन्नमापि दृष्टराजपुत्रीविपत्तेर्युक्तमिहैवात्मानमाहुतीकर्त्तुम्।

कञ्चु। साक्षम्। हा महाराज! हा कहाराज! किमिदमकारणमेव भरतकुलं संशयतुलामारोपितं, अथवा किं प्रलापेनाहमपि भक्तिसदृशमाचरामि। इति सर्वे अग्निप्रवेशं नाटयन्ति।

ततः प्रविशति निगडसंयता सागरिका।

साग। हद्धी हद्धी; आः समन्तदो पज्जलिदो ऊदवहो। अज्ज ऊदवहो दिट्ठिआ करिस्सदि मे दुक्खावसाणं (३)।

राजा। अये! दूयमासन्नऋतवहा सागरिका वर्त्तते। तत् त्वरितमेनां सम्भावयामि। त्वरितमुपसृत्य। अयि प्रिये! किमद्यापि मध्यस्थतया वर्त्तसे।

साग। राजानं दृष्ट्वा आत्मगतम्। कधं अज्जउत्तो; ता एदं

(१) कथं मम दुःखभागिन्या वचनेन एवं व्यवसितं आर्यपुत्रेण; तदहमपि आर्यपुत्रमनुगमिष्यामि।

(२) भवति! अहं हि पथोपदेशको भवामि।

(३) हा धिक् हा धिक्; आः समन्तात् प्रज्वलितो ऋतवहः। अद्य ऋतवहो दिष्ट्या करिष्यति मे दुःखावसानम्।

पेक्खिअ पुणोवि मे जीविदासा संवुत्ता। प्रकाशम्। भट्टा! परित्ताहि परित्ताहि (१)।

राजा। भीरु! अलं भयेन।

मुहूर्त्तमपि सह्यतां, बहुल एव धूमोद्गमः—

अग्रतोऽवलोक्य।

हहा धिगिदमंशुकं ज्वलति ते खनात् प्रच्युतम्।

विलोक्य।

मुग्धः स्खलसि किम्—

निपुणमवलोक्य।

—कथं निगडसंयतासि, द्रुतम्

नयामि भवतीमितः प्रियतमेऽवलम्बस्व माम्॥

कण्ठे गृहीत्वा निमीलिताक्षः स्पर्शसुखं नाटयन्। अहो! क्षणादपगतोऽयं मे सन्तापः। प्रिये! समाश्वसिहि समाश्वसिहि।

व्यक्तं लग्नोऽपि भवतीं न धक्ष्यति हुताशनः।

यतः सन्तापमेवायं स्पर्शस्ते हरति प्रिये॥

अक्षिणी सस्मीलय्य निरीक्ष्य च। अहो महदाश्चर्यम्।

क्वासौ गतो हुतवहस्तदवस्थमेतत्

अन्तःपुरं—

वासवदत्तां दृष्ट्वा।

—कथमवन्तिसुतामजेयम्।

वास। राज्ञः शरीरं परामृशन्ती सहर्षम्। दिट्ठिआ अक्खदसरीरो अज्जउत्तो (२)।

---

(१) कथमार्यपुत्रः; तस्मादेनं प्रेक्ष्य पुनरपि मे जीविताशा संवृत्ता। भर्तः! परित्रायस्व परित्रायस्व।

(२) दिष्ट्या अक्षतशरीर आर्यपुत्रः।

राजा।

बाभ्रव्य एषः—

बाभ्र। विजयतां महाराजः। देव दिष्ट्या वर्द्धसे, पुनरुच्छ्वसिताः स्मः।

राजा।

—वसुभूतिरयम्—

वसु। देव दिष्ट्या वर्द्धसे।

राजा।

—वयस्य

विदू। जेदु जंदु भवं।

राजा। विचिन्त्य। सवितर्कम्।

स्वप्ने मतिर्भ्रमति किं त्विदमिन्द्रजालम्॥

विदू। भो मा सन्देहं करेहि; इन्दजालं क्खु एदं। भणिदं तेण दासीए पुत्तेण ऐन्दजालिएण, जह अवस्सं एव्व देवेण एक्को मे खेड्डणओ दट्ठव्वोत्ति, ता तं ज्जेव एदं (१)।

राजा। देवि! इयमस्माभिरिहानीता त्वद्वचनात् सागरिका।

बाभ्र। विदूषक। अज्जउत्त! जाणिदं दे सव्वं (२)।

वसु। सागरिकां दृष्ट्वा अपवार्य। बाभ्रव्य! सदृशीयं राजपुत्र्याः।

बाभ्र। अमात्य! ममाप्येतदेव मनसि वर्त्तते।

वसु। प्रकाशं राजानमुद्दिश्य। देव! कुतोऽयं कन्यका?

---

(१) भो! मा सन्देहं कुरु; इन्द्रजालं खल्विदम्। भणितं तेन दास्याः पुत्रेण ऐन्द्रजालिकेन, यथा अवश्यमेव देवेन एकं मे खेलनकं द्रष्टव्यमिति, तस्मात्तदेवेदम्।

(२) आर्यपुत्र! ज्ञातं ते सर्वम्।

राजा। देवी जानाति।

वसु। देवि! कुतः पुनरियं कन्यका?

वास। अमच्च! एसा क्खु सागरदो पाविदेत्ति भणिअ, अमच्चजोअन्धरायणेन मम हत्थे निक्खित्ता; अदो एव्व सागरिअत्ति सद्दावीअदि (१)।

राजा। स्वगतम्। कथं, यौगन्धरायणेन न्यस्ता? कथमसौ ममानिवेद्य किञ्चित् करिष्यति।

वसु। अपवार्य। बाभ्रव्य! यथा सुसदृशौ वसन्तकस्य कण्ठे रत्नमाला, अस्या अपि सागरात् प्राप्तिः तथा व्यक्तं सिंहलेश्वरस्य दुहिता रत्नावलीयम्। उपसृत्य प्रकाशम्। आयुष्मति रत्नावलि! त्वमीदृशीमवस्थां गतासि।

सागः। हद्धा। साक्खम्। कधममच्चो वसुभूदी? (२)।

वसु। हा हतोऽस्मि मन्दभाग्यः। इति भूमौ पतति।

सागः। हा हदह्मि, मन्दभाइणी; हा ताद! हा अम्ब! कह्मिं सि, देहि मे पडिवअणं। इत्यात्मानं पातयन्ती मोहमुपगता।

वास। ससम्भ्रमम्। कञ्चुइ! इयं सा मम बहिणिआ रअणावली? (४)।

कञ्चु। देवि! इयमेव सा।

---

(१) अमात्य! एषा खलु सागरतः प्राप्ता, इति भणित्वा, अमात्ययौगन्धरायणेन मम हस्ते निक्षिप्ता, अतएव सागरिकेति शब्द्यते।

(२) कथममात्यो वसुभूतिः?

(३) हा हताऽस्मि मन्दभागिनी; हा तात! हा अम्ब! कुत्रासि, देहि मे प्रतिवचनम्।

(४) कञ्चुकिन्! इयं सा मम भगिनी रत्नावली?

वास। रत्नावलीमालिङ्ग्य। बहिणि! समस्सस समस्सस (१)।

राजा। कथमुदात्तवंशप्रभवस्य सिंहलेश्वरस्य विक्रमबाहोरात्मजेयम्।

विदू। स्वगतं रत्नमालां दृष्ट्वा। पढमे एव्व जाणिदं मए, णाऊ सामसुजणस्स दूदिसो परिच्छदो होदित्ति (२)।

वास। उत्थाय। राजपुत्ति! समाश्वसिहि, समाश्वसिहि। नन्वियं ज्यायसी ते भगिनी दुःखमास्ते; तत् परिष्वजस्वैनाम्।

रत्नावली। समाश्वस्य, राजानं तिर्यगवलोक्य, स्वगतम्। किदाबराधा क्खु अहं देवीए ण सक्कणोमि मुहं दंसिदुं (३)। अधोमुखी तिष्ठति।

वास। सास्रं बाहुं प्रसार्य। एहि अदिनिट्ठुरे! दाणिं पिअबहिणी एहि, सिणेहं दंसेहि (४)। इति कण्ठे गृह्णाति।

रत्नावली। स्खलितं नाटयति।

वास। अपवार्य। अज्जउत्त! लज्जेमि अहं दूमिणा अत्तणो णिसंसत्तणेण, ता लहुं अवणेहि से एदं बन्धणं (५)।

राजा। सपरितोषम्। यथाह देवी। सागरिकाया बन्धनमपनयति।

वास। अज्जउत्त! अमच्चजोअन्धरायणेण एत्तिअं कालं दुज्जणीकिदाम्हि, जेण जाणन्तेणवि ण मे णिवेदिदं (६)।

(१) भगिनि! समाश्वसिहि समाश्वसिहि।

(२) प्रथममेव ज्ञातं मया, नहि साधारणजनस्येदृशः परिच्छदो भवतीति।

(३) कृतापराधा खल्वहं देव्या न शक्नोमि मुखं दर्शयितुम्।

(४) एहि अतिनिष्ठुरे! इदानीमसि प्रियभगिनी! एहि, स्नेहं दर्शय।

(५) आर्यपुत्र! लज्जे अहमनया आत्मनो नृशंसत्वेन, तस्मात् लघु अपनयास्या बन्धनम्।

(६) अमात्ययौगन्धरायणेनैतावन्तं कालं दुर्जनीकृताऽस्मि, येन जानतापि न मे निवेदितम्।

ततः प्रविशति यौगन्धरायणः।

यौगन्धरायणः।

देव्या मद्वचनात् तथाभ्युपगतः पत्युर्वियोगो महान्
सा देव्यन्यकलत्रसंघटनया दुःखं परं प्रापिता।
तस्याः प्रीतिमियं करिष्यति जगत्स्वामित्वलाभः प्रभोः
सत्यं दर्शयितुं तथापि वदनं शक्नोमि नो लज्जया॥ *॥

अथवा, किं क्रियते ईदृशमत्यन्तमाननीयेष्वपि निरनुरोधवृत्ति स्वामिभक्तिव्रतम्। निरूप्य। अयं देवो महाराजः, यावदुपसर्पामि। उपसृत्य। जयतु जयतु देवः, देव! श्रूयतां यन्मया अनिवेद्य कृतम्।

राजा। कथय किमनिवेद्य कृतम्।

यौग। करोत्वासनपरिग्रहं देवः, सर्वं विज्ञापयामि।

सर्वे। उपविशन्ति।

यौग। देव! श्रूयतां; येयं सिंहलेश्वरस्य दुहिता सा सिंहलेनादिष्टा, यथा योऽस्याः पाणिग्रहणं करिष्यति, स सार्वभौमो राजा भविष्यति; ततस्तत्प्रत्ययादस्माभिः स्वामिनोऽर्थे बद्धयः प्रार्थ्यमानेनापि सिंहलेश्वरेण देव्या वासवदत्तायाश्चित्तखेदं परिहरता यदा न दत्ता।

---

* देव्या इति। देव्या वासवदत्तया मद्वचनात् पत्युः स्वामिनः महान् दीर्घः वियोगो विरहः तथा तेन प्रकारेण अभ्युपगतः सोढः। सा देवी अन्यकलत्रसङ्घटनया सपत्नीघटनया मया दुःखं प्रापिता, किन्तु अयं रत्नावल्या सह राज्ञो विवाहे सति भावी प्रभोः स्वामिनः जगत्स्वामित्वलाभः समग्रधराधिपत्वप्राप्तिः तस्याः देव्याः प्रीतिं आनन्दं करिष्यति जनयिष्यतीति सत्यं तथापि देव्या महदप्रियकरणेन अहं लज्जया तस्यै मुखं दर्शयितुं नैव शक्नोमि समर्थो भवामि।

राजा। तदा किम्।

यौगं। तदा लावणिकेन वह्निना देवौ दग्धेति प्रसिद्धिमुत्पाद्य, तदन्तिकं बाभ्रव्योऽपि प्रहितः।

राजा। यौगन्धरायण! अतःपरं श्रुतं मया, अथेयं देवीहस्ते किमप्यनुचिन्त्य स्थापिता।

विदू। भो! एदस्स अभिप्पओ मए जाणदा; अणाक्खादं एदं जाणीअदि एव्व, जह अन्तेउरगदं एदं जाव अन्तेउरगदो देवो सुहेण दंसइस्सदित्ति (१)।

राजा। यौगन्धरायण! गृहीतस्तेऽभिप्रायो वसन्तकेन।

यौगं। यदाज्ञापयति देवः।

राजा। ऐन्द्रजालिकदत्तान्तोऽपि मन्ये त्वत्प्रयोग एव।

यौगं। अन्यथा अन्तःपुरे बद्धायां अस्याः कुतो देवेन दर्शनम्? अदृष्टायाश्च वसुभूतिना कुतः परिज्ञानम्।

राजा। विहस्य। परिज्ञातायाश्च भगिन्याः सम्प्रति यथा करणीयं, तथा देवी प्रमाणम्।

वास। अज्जउत्त! फुडं एव्व किं ण भणासि, जह पडिवादेहि मए रअणावलिंत्ति (२)।

विदू। भोदि, सुट्ठु तुए जाणिदो अमच्चस्स अभिप्पाओ(३)।

---

(१) भो! एतस्याभिप्रायो मया ज्ञातः; अनाख्यातमपि इदं ज्ञायते एव, यथान्तःपुरगतामेतामन्तःपुरगतो देवः सुखेन द्रक्ष्यतीति।

(२) आर्यपुत्र! स्फुटमेव किं न भणसि, यथा प्रतिपादय मह्यं रत्नावलीमिति।

(३) भवति! सुष्ठु त्वया ज्ञातोऽमात्यस्याभिप्रायः।

वास। हस्तौ प्रसार्य। एहि रत्नावलि! एहि; दाणिं किम्पि दे मे बहिणिआअणुरूवं होदु(१)। इति रत्नावलीं सकौतु-काभरणैरलंकृत्य, हस्ते गृहीत्वा, राजानमुपसृत्य। अज्जउत्त! एदं रत्नावलिं पडिच्छ(२)।

राजा। सहर्षं हस्तौ प्रसार्य। को देव्याः प्रसादो न बहु मन्यते। इति सागरिकां गृह्णाति।

वास। अज्जउत्त! दूरे खु एसाए णादिउलं, ता तह करेदु, जह बन्धुजणं ण सुमरेदि(३)। इति समर्पयति।

राजा। यथाज्ञापयति देवी।

विदू। सहर्षं नृत्यति। हो हो भो! जअदु जअदु भवं पुहवी खु दाणिं हत्थगदा पिअवअस्सस्स(४)।

वसु। राजपुत्रि! वासवदत्तां प्रणामेनार्चय

रत्नावली। तथा करोति।

बाभ्र। देवि! स्थाने देवीशब्दमुद्वहसि।

वास। रत्नावलीमालिङ्ग। देवीशब्देन प्रसादं करोति।

बाभ्र। इदानीं सफलपरिश्रमोऽस्मि संवृत्तः।

यौग। देव! किं ते भूयः प्रियमुपकरोमि।

राजा। किमतःपरमपि प्रियमस्ति। यतः

---

(१) एहि रत्नावलि! एहि; किमपि ते मे भगिन्या अनुरूपं भवतु।

(२) आर्यपुत्र! इमां रत्नावलीं प्रतीच्छ।

(३) आर्यपुत्र! दूरे खलु एतस्या ज्ञातिकुलं, तस्मात् तथा कुरु यथा बन्धु-जनमेषा न स्मरति।

(४) जयतु जयतु भवान्; पृथिवी खल्विदानीं हस्तगता प्रियवयस्यस्य।

नीतो विक्रमबाहुरात्मसमतां प्राप्तेयमुर्वीतले
सारं सागरिका ससागरमहीप्राप्तैकहेतुः प्रिया।
देवी प्रीतिमुपागता च भगिनीलाभात् जिताः कोशलाः
किं नामास्ति विधेयमत्र भुवने यस्मिन् करोमि स्पृहाम् ॥*॥
तथापीदमस्तु।

---

* नीत इति। विक्रमबाहुः सिंहलेश्वरः आत्मसमतां नीतः प्रापितः अस्य कन्यायाः पाणिग्रहणेनासौ बन्धुमानित इत्यर्थः उर्वीतले महीतले सारं सारभूता त्रिभुवनललामभूता इत्यर्थः ससागरायाः सागराम्बरायाः मह्याः पृथिव्याः प्राप्तेर्लाभस्य एकोऽद्वितीयः हेतुः कारणं सागरिका प्राप्ता अधिगता। देवी वासवदत्ता च भगिनीलाभात्, रत्नावलीप्राप्त्या प्रीतिं सन्तोषं उपगता प्राप्ता, कोशलाः कोशलराज्यं जिताः निर्जिताः स्ववशमानीताः, अतएव सर्व एव कामाः मम सिद्धाः अत्र भुवने भूमण्डले किं नाम वस्तु विधेयं प्रार्थनीयं अस्ति यस्मिन् यत्प्राप्त्यर्थं स्पृहां इच्छां करोमि। तव चेष्टया मम सर्वएव अभावा निराकृताः, अधुना न किमपि प्रार्थयितव्यमस्तीति भावः। किं नास्ति त्वयि सत्यमात्यवृषभे यस्मै करोमि स्पृहामिति पाठान्तरम्।

भरतवाक्यम् ।

—— oo ——

उर्वीमुद्दामशस्यां जनयतु विसृजन् वासवो दृष्टिमिष्टाम्
दृष्टैस्तैर्विष्टपानां विदधतु विधिवत् प्रीणनं विप्रमुख्याः ।
आकल्पान्तञ्च भूयात् समुपचितसुखः सङ्गमः सज्जनानाम्
निःशेषं यान्तु शान्तिं पिशुनजनगिरो दुर्जया वज्रलेपाः ॥ * ॥

इति निष्क्रान्ताः सर्वे ।

इति इन्द्रजालिको नाम

चतुर्थोऽङ्कः ।

इति श्रीहर्षदेवस्य कृतिरियं रत्नावली समाप्ता ।

---

* उर्वीमिति । वासव इन्द्रः दृष्टां अभिलषितां दृष्टिं विसृजन् उर्वीं पृथिवीं उद्दामानि पर्य्याप्ताधिकानि शस्यानि यस्यां सा तां प्रभूतशस्यशालिनीं जनयतु विदधातु, विप्रमुख्याः ब्राह्मणश्रेष्ठाः तैः दृष्टैः यज्ञैः विधिवत् विष्टपानां इन्द्रलोकानां प्रीणयनं प्रीतिं विदधातु कुर्वन्तु, यज्ञैः शक्रं प्रीणयन्तु इत्यर्थः । आकल्पान्तञ्च कल्पान्तकालपर्य्यन्तञ्च समुपचितसुखः अतिशयितसुखप्रदः सज्जनानां साधूनां सङ्गमः मिलनं भूयात् भवतु, तथा दुर्जेयाः दुःखेन विजेयाः अतिकठिना इत्यर्थः वज्रलेपाः वज्रलेपवत् कठिनाः पिशुनजनानां खलानां गिरः वाक्यानि निःशेषं साकल्येन शान्तिं यान्तु प्राप्नुवन्तु । पिशुनः खल-सूचकाविति अभिधानात् ।

Digitized with financial assistance from the
Government of Maharashtra
on 18 July, 2018